श्रीः ।

श्रीमत्केशवमिश्रप्रणीता

तर्कभाषा ।

श्रीकाशीवासिद्विवेदिपण्डितविन्ध्येश्वरीप्रसा-
दशर्मभिः टिप्पण्यादिभिः संस्कृता

तथा

मैसूरराजधानी महाराजास्थान पण्डित
काशीशेषव्यंकटाचलशर्मभिः शोधिता ।

पण्डित ज्येष्ठाराम मुकुन्दजीशर्मणा

मुम्बय्यां

"निर्णयसागर" मुद्रणयन्त्रालये मुद्रयित्वा प्रकाशिता ।

शकाब्दाः १८१५, खीस्ताब्दाः १८९४.

प्रस्तावना.

अद्य खलु सकललौकिक-वैदिक-व्यवहारोपयोगिन्यायशास्त्रीययावन्मूलसिद्धान्तजिज्ञासूनां नासीत् कोपि प्राक्तनः संक्षिप्तयावदर्थः (सुप्रसिद्धः) ग्रंथो यथा तार्किकचक्रचूडामणिश्रीकेशवमिश्रविरचितः तर्कभाषाख्यो मूलग्रंथः (तथा अन्यः) इति विदितमेव सर्वेषाम् ।

तथाभूतस्ससकलविद्वदादरणीयोपि केनापि निमित्तेन घर्मकालेनांकुरादिरिव चिरं ह्रासं प्रापितोपि वर्षाकालेनेव इदानीं आंग्लप्रभुवर्याणां कटाक्षामृतवर्षप्रसारणेनातीव वर्द्धिष्णुपदवीमारुरोह ।

येनानेन अर्थबहुलेन ग्रंथेन सर्वेषान्तदध्येतॄणां महानुपकारो भवेत् अल्पेनैव कालेन तथानाऽतिदुरूहैर्महानिबंधनैः पुरुषायुषमात्रेपि प्रायो महोपकाराय दुह्यद्भिः ।

नाममात्रशेषोप्ययं ग्रंथः अतिप्रयासेन कानिचित्परं शिथिलानि खण्डितानि च पुस्तकान्यवाप्यातिक्लेशेन (यथामति) परिशोध्य मुद्रितः तत्रतत्र प्रदर्शितपाठभेदश्च ।

ततश्च विद्यारसिकानां गुणदृष्ट्या कटाक्षानुग्रहपात्रं भूत्वा तेषामाह्लादकारी ग्रंथकर्तुः पण्डित श्रीकेशवमिश्रस्य श्रमसाफल्यकारी च भवत्येवेति शिवम् ।

तर्कभाषामुख्यविषयसूचीपत्राणि ।

श्रीगणेशाय नमः ॥

तर्कभाषा

बालोऽपि यो न्यायनये प्रवेश-
मल्पेन वाञ्छत्यलसः श्रुतेन ।
सङ्क्षिप्तयुक्त्यन्विततर्कभाषा
प्रकाश्यते तस्य कृते मयैषा ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमं सूत्रम् । अस्यार्थः । प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्मोक्षप्राप्तिर्भवति । न च प्रमाणादीनां तत्त्वज्ञानं सम्यक् ज्ञानं तावद्भवति यावदेषामुद्देशलक्षणपरीक्षा न क्रियन्ते । यदाह भाष्यकारः । त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेति । उद्देशस्तु नाममात्रेण वस्तुसङ्कीर्तनम् । तच्चास्मिन्नेव सूत्रे कृतम् । लक्षणं त्वसाधारणधर्मवचनम्[१] ।

(१) लक्षणं तु । लक्षणशास्त्रं तु । असाधारणः लक्ष्यतावच्छेदकव्यापकत्वे सति लक्ष्यतावच्छेदकव्याप्यो यो धर्म्मः तद्वचनं तत्प्रतिपादकं वाक्यं लक्षणशास्त्रमित्यर्थ इति गौरीकान्तभट्टाचार्य्याः । नामधेयेन पदार्थानाम-

यथा गोः सास्नादिमत्त्वम् । यथा लक्षितस्य लक्षणमुपपद्यते न वेति विचारः परीक्षा । तेनैते लक्षणपरीक्षे प्रमाणादीनां तत्त्वे अवश्यकर्तव्ये । तत्रापि प्रथममुद्दिष्टस्य प्रमाणस्य तावल्लक्षणमुच्यते । प्रमाकरणं प्रमाणम् । अत्र च प्रमाणं लक्ष्यम् । प्रमाकरणत्वं लक्षणम् । ननु प्रमायाः करणं चेत् प्रमाणं तर्हि तस्य फलं वक्तव्यम् करणस्य फलवत्त्वनियमात् । सत्यम् । प्रमैव फलं साध्यमित्यर्थः । यथा छिदाकरणस्य परशोः छिदैव फलम् । का पुनः प्रमा यस्याः करणं प्रमाणम् । उच्यते । यथार्थानुभवः प्रमा । यथार्थ इत्ययथार्थानां संशयविपर्ययतर्कज्ञानानां निरासः । अनुभव इति स्मृतेर्निरासः । अनुभवो हि स्मृतिव्यतिरिक्तं ज्ञानम् । किं पुनः करणम् साधकतमं करणमिति पर्यायः । तदेव न ज्ञायते किं करणमिति । उच्यते । यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत् करणम् । यथा तन्तुवेमादिकं पटस्य । यद्यपि पटोत्पत्तौ दैवादागतस्य रासभादेः पूर्वभावो विद्यते तथापि नासौ नियतः । तन्तुरूपस्य तु नियतः पूर्वभावोस्त्येव किं त्वन्यथासिद्धः पटरूपजननोपक्षीणत्वात् । पटं प्रत्यपि कारणत्वे

भिधानमुद्देशः उद्दिष्टस्य स्वपरजातीयव्यावर्त्तको धर्म्मो लक्षणम् लक्षितस्य यथालक्षणं विचारः परीक्षा इति न्यायकन्दलीकृतः । समानासमानजातीयव्यवच्छेदो लक्षणार्थः इति न्यायवार्तिककृतः ।

कल्पनागौरवात्। तेनानन्यथासिद्धनियतपूर्वभावित्वं कारणत्वम्। अनन्यथासिद्धनियतपश्चाद्भावित्वं कार्यत्वम्। यत्तु कश्चिदाह। कार्यानुकृतान्वयव्यतिरेकि कारणमिति[1]। तदयुक्तम्। नित्यविभूनां व्योमादीनां कालतो देशतश्च व्यतिरेकासम्भवेनाकारणत्वप्रसङ्गात्। तच्च कारणं त्रिविधम्। समवाय्यसमवायिनिमित्तभेदात्। तत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य समवायिकारणम्। यतस्तन्तुष्वेव पटः समवेतो जायते न तुर्यादिषु। ननु तन्तुसम्बन्ध इव तुर्यादिसम्बन्धोऽपि पटस्य विद्यते तत् कथं तन्तुष्वेव पटः समवेतो जायते न तुर्यादिषु। सत्यम्। द्विविधः सम्बन्धः संयोगः समवायश्चेति। तत्रायुतसिद्धयोः सम्बन्धः समवायः। अन्ययोस्तु संयोग एव[2]। कौ पुनरयुतसिद्धौ। ययोर्मध्ये एकमनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ[3]। तदुक्तम्।

---

(१) अत्र लक्षणद्वये तात्पर्य्यम्। अनन्यथासिद्धनियतस्य यदन्वये यदन्वयः इत्येकः स्वस्वव्याप्येतरसकलकारणसमवधाने अनन्यथासिद्धनियतस्य यद्व्यतिरेकात् यद्व्यतिरेक इत्यपरमिति गोवर्धनेनोक्तम्। (२) कालिकतादात्म्यादिसम्बन्धानां विद्यमानत्वेऽपि एवकारस्य प्रयोजनं केशवमिश्रा एव जानन्ति। (३) न्यायकन्दल्यां यत्र तु द्वयोरपि सम्बन्धिनोः परस्परपरिहारेणव्यतिरिक्ताश्रयाश्रयित्वं तत्र युतसिद्धिः। यथा त्वगिन्द्रियशरीरयोः शरीरं हि त्वगिन्द्रियपरिहारेण पृथगाश्रये स्वावयवे समा-

तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः ।
अनश्यदेकमपराश्रितमेवावतिष्ठते ॥

यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। अवयव्यादयो हि यथाक्रममवयवाद्याश्रिता एवावतिष्ठन्ते अविनश्यन्तः । विनश्यदवस्थास्त्वनाश्रिता एवावतिष्ठन्ते अवयव्यादयः। यथा तन्तुनाशे सति पटः। यथा वा आश्रयनाशे सति गुणः । विनश्यत्ता तु विनाशकारणसामग्रीसान्निध्यम् । तन्तुपटावपि अवयवावयविनौ। तेन तयोः सम्बन्धः समवायः । अयुतसिद्धत्वात् । तुरीपटयोस्तु अयुतसिद्धत्वाभावात् । नहि तुरी पटाश्रितैवावतिष्ठते नापि पटस्तुर्याश्रितः । अतस्तयोः सम्बन्धः संयोग एवं । तदेवं तन्तुसमवेतः पटः । यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम् । अतस्तन्तव एव समवायिकारणं पटस्य न तु तुर्यादि । पटश्च स्वगतरूपादेः समवायिकारणम् । एवं मृत्पिण्डोऽपि घटस्य सम-

---

श्रितं तेनानयोस्संयोगो न समवायः । नित्यानां तु युतसिद्धिः पृथगवस्थितिः पृथग्भवनयोग्यता । सा ययोर्नास्ति तौ अयुतसिद्धौ तयोर्यः सम्बन्धः स समवायः इत्युक्तं श्रीधरभट्टाचार्य्यचरणैः । (१) न हि तुरी पटाश्रितैव न तिष्ठति नापि पटस्तुर्याश्रितः इति तुरीपटयोस्तु अयुतसिद्धत्वाभावादित्यतस्तयोस्संबंधस्संयोग एवेत्यन्वयः ।

वायिकारणम् । घटश्च स्वगतरूपादेः । ननु यदैव घटादयो जायन्ते तदैव तद्गतरूपादयोपि । अतः समानकालीनत्वात् गुणगुणिनोः सव्येतरविषाणवत्[1] कार्यकारणभावो नास्ति । पौर्वापर्याभावात् । अतो न समवायिकारणं घटादयः स्वगतरूपादीनां कारणविशेषत्वात् समवायिकारणस्य । अत्रोच्यते । न गुणगुणिनोः समानकालीनं जन्म । किं तु द्रव्यं निर्गुणमेव प्रथममुत्पद्यते पश्चात् तत्समवेता गुणा उत्पद्यन्ते । समानकालोत्पत्तौ तु गुणगुणिनोः समानसामग्रीकत्वात् भेदो न स्यात् । कारणभेदनियतत्वात् कार्यभेदस्य । तस्मात् प्रथमे क्षणे निर्गुण एव घट उत्पद्यते । गुणेभ्यः पूर्वभावीति भवति गुणानां समवायिकारणम् । तदा कारणभेदोऽप्यस्ति घटो हि घटं प्रति न कारणं । एकस्यैव पौर्वापर्याभावात् । नहि स एव तमेव प्रति पूर्वभावी पश्चाद्भावी चेति । स्वगुणं प्रति तु पूर्वभावित्वाद्भवति गुणानां कारणम् । नन्वेवं सति प्रथमे क्षणे घटोऽचाक्षुषः स्यात् अरूपिद्रव्यत्वात् वायुवत् । तदेव हि द्रव्यं चाक्षुषं यन्महत्त्वे सत्युद्भूतरूपवत् अद्रव्यं च स्यात् गुणाश्रयत्वाभावात् । गुणाश्रयो हि द्रव्यमिति

---

(१) यथा सव्येतरविषाणयोः समानकालोत्पत्तिकत्वेन न कार्य्यकारणभावः तथा गुणगुणिनोः समानकालोत्पत्तिकत्वादेव कार्य्यकारणभावो नास्ति अन्यथा सव्येतरविषाणयोरपि कार्य्यकारणभावस्वीकारापत्तेरिति भावः ।

द्रव्यलक्षणम् । सत्यम् । प्रथमे क्षणे घटो[1] यदि चक्षुषा न गृह्यते तदा का नो हानिः। न हि सगुणोत्पत्तिक्षणेऽपि[2] निमेषावसरे घटो गृह्यते। तेन व्यवस्थितमेतत्। निर्गुण एव प्रथमं घट उत्पद्यते द्वितीयादिक्षणे चक्षुषा गृह्यते न च प्रथमे क्षणे। अद्रव्यत्वापत्तिः[3] समवायिकारणं द्रव्यमिति द्रव्यलक्षणयोगात्। योग्यतया गुणाश्रयत्वाच्च। असमवायिकारणं तदुच्यते। यत्समवायिकारणप्रत्यासन्नमवधृत[4]सामर्थ्यं तदसमवायिकारणम्। यथा तन्तुसंयोगः पटस्यासमवायिकारणम्। तन्तुसंयोगस्य गुणस्य समवायिकारणेषु तन्तुषु गुणिषु समवेतत्वेन समवायिकारणप्रत्यासन्नत्वात्। अनन्यथासिद्धनियतपूर्वभावित्वेन पटं प्रति कारणत्वाच्च। एवं तन्तुरूपं पटरूपस्यासमवायिकारणम्। ननु पटरूपस्य पटः समवायिकारणं तेन तद्गतस्यैव कस्यचिद्धर्मस्य पटरूपं प्रत्यसमवायिकारणत्वमुचितं तस्यैव समवायिकारणप्रत्यासन्नत्वात् न। तन्तुरूपस्य तस्य समवायिकारणप्रत्यासत्त्य-

(१) परमसूक्ष्मो यदि घटादिः २ पु.। (२) पक्षेऽपि २ पु.। (३) गुणाश्रयत्वाभावात् इत्यधिकम् २ पु.। (४) अवधृतं गृहीतं सामर्थ्यं कार्य्योत्पत्तौ नियतपूर्ववर्त्तित्वं यस्य तदवधृतसामर्थ्यम्। तथा च समवायिकारणप्रत्यासन्नत्वे सति यत्कारणं तदसमवायिकारणम् अत्र लक्षणे इष्टसाधनताज्ञानादीनामिच्छाद्यसमवायिकारणत्ववारणाय पुनरात्मविशेषगुणभिन्नत्वं निवेशनीयम्।

भावात् ! मैवम् । तत्समवायिकारणसमवायिकारणप्रत्यासन्नस्यापि परम्परया तन्तुरूपस्य समवायिकारणप्रत्यासन्नत्वात् । निमित्तकारणं तदुच्यते । यन्न समवायिकारणं नाप्यसमवायिकारणम् अथ च कारणं तन्निमित्तकारणम् । यथा वेमादिकं पटस्य निमित्तकारणम् । तदेतद्भावानामेव त्रिविधं कारणम् । अभावस्य तु निमित्तमात्रम् । तस्य क्वचिदप्यसमवायात् । समवायस्य भावद्वयधर्मत्वात् । तदेतस्य त्रिविधस्य कारणस्य मध्ये यदेव कथमपि सातिशयं तदेव करणम् । तेन व्यवस्थितमेतल्लक्षणम् । प्रमाकरणं प्रमाणमिति । यत्त्वनधिगतार्थगन्तृप्रमाणमिति लक्षणम्[1] । तन्न । एकस्मिन्नेव घटे घटोऽयं घटोऽयमिति धारावाहिकज्ञानानां गृहीतग्राहिणामप्रामाण्यप्रसङ्गात् । न चान्यान्यक्षणविशिष्टविषयीकरणादनधिगतार्थगन्तृता प्रत्यक्षेण सूक्ष्मकालभेदानाकलनात् भेदग्रहे हि क्रियादिसंयोगान्तानां[2] चतुर्णां यौगपद्याभिमानो न स्यात् । क्रियाक्रियातो विभागः

(१) अगृहीतग्राहित्वं प्रमात्वमिति मीमांसकानां वेदान्तिनां च मते अगृहीतग्राहिज्ञानकरणत्वं प्रमाणत्वमिति अगृहीतग्राहित्वं नाम अगृहीतविषयकत्वम् स्वपूर्ववर्तिज्ञानाविषयविषयकत्वमितियावत् । तन्मते धाराद्वितीयादिज्ञानानां अगृहीतविषयकत्वाभावात् तत्राव्याप्तिरिति भावः ॥
(२) कालभेदग्रहे हि क्रियाक्रियातो विभागः विभागात् पूर्व्वसंयोगनाशः तदुत्तरसंयोगोत्पत्तिरिति क्रियादिसंयोगान्तानाम् २ पु. ।

विभागात् पूर्वसंयोगनाशस्ततश्चोत्तरसंयोगोत्पत्तिरिति -। ननु प्रमायाः कारणानि बहूनि सन्ति प्रमातृप्रमेयादीनि तान्यपि किं कारणानि उत नेति । उच्यते । सत्यपि प्रमातरि प्रमेये च प्रमानुत्पत्तेः इन्द्रियसंयोगादौ सत्यविलम्बेन प्रमोत्पत्तेः अत इन्द्रियसंयोगादिरेव करणम्। प्रमायाः साधकत्वाविशेषेऽपि अनेनैवोत्कर्षेणास्य प्रमात्रादिभ्योऽतिशयितत्वात् अतिशयितं साधकं साधकतमं तदेव प्रमायाः करणमित्युक्तं प्रागेव । अत इन्द्रियसंयोगादिरेव प्रमाकरणत्वात् प्रमाणम् । न प्रमात्रादि । तानि[1] च प्रमाणानि चत्वारि । तथा च न्यायसूत्रम् । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। किं पुनः प्रत्यक्षम् । साक्षात्कारिप्रमाकरणं प्रत्यक्षम् । साक्षात्कारिणी प्रमा सैवोच्यते येन्द्रियजा। सा च द्विधा सविकल्पकनिर्विकल्पकभेदात् । तस्याः करणं त्रिविधम्। कदाचिदिन्द्रियं कदाचिदिन्द्रियार्थसन्निकर्षः कदाचिज्ज्ञानम् । कदा पुनरिन्द्रियं करणम्। यदा निर्विकल्प-

(१) प्रमाणानि कतिविधानीति जिज्ञासायां प्रत्यक्षमेव प्रमाणमिति चार्वाकाः अनुमानमपीति कणादसुगतौ उपमानमपीति केचिन्नैयायिकैकदेशिनः अर्थापत्तिरपीति प्राभाकराः अनुपलब्धिरपीति भाट्टा वेदान्तिनश्च सम्भवैतिह्याख्येअपीति पौराणिकाः तत् सर्वमेव अयुक्तमिति सूचयितुं प्रमाणस्य चातुर्विध्यमाह । तानि चेति ।

करूपा प्रमा फलम् । तथाहि । आत्मा मनसा संयुज्यते मन[1] इन्द्रियेण इन्द्रियमर्थेन इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमात् । ततोर्थसन्निकृष्टेनेन्द्रियेण निर्विकल्पकं नामजात्यादियोज[2]नाहीनं वस्तुमात्रावगाहि किञ्चिदिदमिति ज्ञानं जन्यते । तस्य ज्ञानस्य इन्द्रियं करणम् छिदाया इव परशुः । इन्द्रियार्थसन्निकर्षोवान्तरव्यापारः छिदाकरणस्य परशोरिव दारुसंयोगः । निर्विकल्पकं ज्ञानं फलम् परशोरिव च्छिदा । कदा पुनरिन्द्रियार्थसन्निकर्षः करणम् । यदा निर्विकल्पकानन्तरं सविकल्पकं नामजात्यादियोजनात्मकं डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति विशेषणाविशेष्यावगाहि ज्ञानमुत्पद्यते तदा इन्द्रियार्थसन्निकर्षः करणम् । निर्विकल्पकज्ञानमवान्तरव्यापारः । सविकल्पकं ज्ञानं फलम् । कदा पुनर्ज्ञानं करणम् । यथोक्त[3]सविकल्पकानन्तरं हानोपादानोपेक्षाबुद्धयो जायन्ते तदा निर्विकल्पकं ज्ञानं करणं । सविकल्पकज्ञानमवान्तरव्यापारः । हाना-

---

(१) ज्ञानमात्रं प्रति आत्ममनोयोगः कारणम् एवं त्वङ्मनोयोगोऽपि बोध्यः यदभावात् सुषुप्तिप्राक्कालोत्पन्नज्ञानादिविशिष्टात्मप्रत्यक्षसामग्रीसत्त्वेऽपि सुषुप्तिकाले न ज्ञानमुत्पद्यते सुषुप्तिकाले हि मनस्त्वचं विहाय पुरीततिं प्रवर्त्तते इति गौरीकान्तसार्वभौमभट्टाचार्य्यपादाः ।
(२) योजना वैशिष्ट्यं तेन विशिष्टाविषयकमित्यर्थः इति गौरीकान्तसार्वभौमाः । (३) यदा २ पु. ।

दिबुद्धयः फलम् । तज्जन्यस्तज्जन्यजनकोऽवान्तरव्यापारः[1] । अत्र कश्चिदाह । सविकल्पकादीनामपीन्द्रियमेव करणम् । यावन्त्यान्तरालिकानि सन्निकर्षादीनि तानि सर्वाण्यवान्तरव्यापारः । इन्द्रियार्थयोस्तु यः सन्निकर्षः साक्षात्कारिप्रमाहेतुः स षड्विधः । तद्यथा । संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायो विशेषणविशेष्यभावश्चेति । तत्र यदा[2] चक्षुषा घटविषयं ज्ञानं जन्यते तदा चक्षुरिन्द्रियं । घटोऽर्थः । अनयोः सन्निकर्षः संयोग एव अयुतसिद्ध्यभावात् । एवं मनसान्तरेणेन्द्रियेण यदात्मविषयकं ज्ञानं जन्यतेऽहमिति तदा मन इन्द्रियं । आत्मार्थः । अनयोः सन्निकर्षः संयोग एव । कदा पुनः संयुक्तसमवायसन्निकर्षः । यदा चक्षुरादिना घटगतरूपादिकं गृह्यते घटे श्यामं रूपमस्तीति तदा चक्षुरिन्द्रियं । घटरूपमर्थः । अनयोः सन्निकर्षः संयुक्तसमवाय एव । चक्षुःसंयुक्ते घटे रूपस्य समवायात् । एवं मनसा आत्मसमवेते सुखादौ गृह्यमाणे अयमेव सन्निकर्षः । घटगतपरिमाणादिग्रहे[3] चतुष्टयसन्निकर्षोऽप्यधिकं कारणमिष्यते सत्यपि संयुक्तसमवाये तदभावे दूरे परि-

---

(१) यथा कुठारजन्यः कुठारदारुसंयोगः कुठारजन्यच्छिदाजनकः इत्यधिकम् २ पु. । (२) यदा पुनः २ पु. । (३) परिमाणादिग्रह इति परिमाणगतोत्कर्षादिग्रहे इत्यर्थः ।

माणाद्यग्रहणात्[1]। चतुष्टयसन्निकर्षो यथा[2]। इन्द्रियावयवैरर्थावयविनाम् इन्द्रियावयविनार्थावयवानाम् इन्द्रियावयवैरर्थावयवानां अर्थावयविनामिन्द्रियावयविनां सन्निकर्ष इति । यदा पुनश्चक्षुषा घटरूपसमवेतं रूपत्वादि सामान्यं गृह्यते तदा चक्षुरिन्द्रियं। रूपत्वादिसामान्यमर्थः। अनयोः सन्निकर्षः संयुक्तसमवेतसमवाय एव । यतः चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायः। कदा पुनः समवायः सन्निकर्षः। यदा श्रोत्रेन्द्रियेण शब्दो गृह्यते तदा श्रोत्रमिन्द्रियं। शब्दोऽर्थः। अनयोः सन्निकर्षः समवाय एव [3]श्रोत्रस्याकाशात्मकत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् । कदा पुनः समवेतसमवायः । यदा पुनः शब्दसमवेतं शब्दत्वादिसामान्यं श्रोत्रेन्द्रियेण गृह्यते तदा श्रोत्रमिन्द्रियं। शब्दत्वादिसामान्यमर्थः। अनयोः सन्निकर्षः समवेतसमवाय एव । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् । कदा पुनर्विशेषणविशेष्य-

---

(१) परिमाणाद्यग्रहणात् । परिमाणवृत्तिविशेषाग्रहादित्यर्थः । परिमितमिदमिति । सामान्यतः परिमाणग्रहस्य दूरादावपि सम्भवात् । चतुष्टयेति । सर्व्वावयवावच्छिन्नेन्द्रियसंयोगस्य हेतुतोक्तौ विनिगमनाविरहात् चतुष्टयत्वं बोध्यमिति गौरीकान्तसार्व्वभौमाः । (२) यथापुनरिति गोपीनाथसम्मतः पाठः । (३) कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम् २ पु. ।

भावलक्षणमिन्द्रियार्थसन्निकर्षो भवति । यदा चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते इह भूतले घटो नास्तीति तदा विशेषणविशेष्यभावः सम्बन्धः[1] । तदा चक्षुःसंयुक्तस्य भूतलस्य घटाद्यभावो विशेषणम्[2] भूतलं विशेष्यम् । यदा च मनःसंयुक्ते आत्मनि सुखाद्यभावो गृह्यते अहं सुखरहित इति । तदा मनःसंयुक्तस्यात्मनः सुखाद्यभावो विशेषणम् । यदा श्रोत्रसमवेते गकारे घत्वाभावो गृह्यते तदा श्रोत्रसमवेतस्य गकारस्य घत्वाभावो विशेषणम् । तदेवं संक्षेपतः पञ्चविध[3]सम्बन्धान्यतमसम्बन्धसम्बद्धविशेषणविशेष्यभावलक्षणेनेन्द्रियार्थसन्निकर्षेणाभाव इन्द्रियेण गृह्यते[4] । एवं समवायोपि चक्षुःसम्बद्धस्य तन्तोर्विशेष्यभूतः पटसमवायो गृह्यते[5] इह तन्तुषु पटसमवाय इति । तदेवं षोढा सन्निकर्षो वर्णितः । संग्रहश्च ।

---

(१) तदा विशेषणविशेष्यभावः सम्बन्धः इति नास्ति २ पुस्तके । (२) भूतलं विशेष्यमिति पाठो मूलग्रन्थेषु नास्ति परन्तु गौरीकान्तसार्वभौमेन प्रतीकं धृत्वा विचारः कृतः । (३) संयोगस्तु पूर्वमुक्तः तदतिरिक्तः पञ्चविधः सन्निकर्ष इत्यर्थः इति गौरीकान्तसार्वभोमाः ॥ (४) तदेवं पञ्चविधः सम्बन्धः सम्बन्धिविशेषणविशेष्यभावलक्षणेन इन्द्रियार्थसन्निकर्षेण अभाव इन्द्रियेण गृह्यते २ पु. । (५) अक्षजा प्रमितिरिति १ पु. ।

अक्षजा प्रमितिर्द्वेधा सविकल्पाविकल्पिका ।
कारणं त्रिविधं तस्याः सन्निकर्षस्तु षड्विधः ॥
घटत्वनीलनीलत्वशब्दशब्दत्वजातयः ।
अभावसमवायौ च ग्राह्याः सम्बन्धषट्कतः[1] ॥

ननु निर्विकल्पिकं परमार्थतः[2] स्वलक्षणविषयं भवतु प्रत्यक्षम् । सविकल्पकं तु शब्दलिङ्गवदनुगताकारावगाहित्वात् सामान्यविषयं कथं प्रत्यक्षम्[3] । अर्थजस्यैव प्रत्यक्षत्वात् । अर्थस्य च परमार्थतः सत एव तज्जनकत्वात् । स्वलक्षणं तु परमार्थतः सत् न तु सामान्यम् । तस्य प्रमाणनिरस्तविधिभावस्यान्यव्यावृत्त्यात्मनस्तुल्यत्वात् । मैवम् । सामान्यस्य वस्तुभूतत्वात् ॥ एवं व्याख्यातं प्रत्यक्षम् ॥ ॥ ॥

लिङ्गपरामर्शोऽनुमानम् । येन ह्यनुमीयते तदनुमानम् । लिङ्गपरामर्शेनानुमीयते अतो लिङ्गपरामर्शोऽनुमानम् । तच्च धूमादिज्ञानम् । अनुमितिं प्रति करणत्वात् । अग्न्यादिज्ञानमनुमितिः । तत्करणं हि धूमज्ञानम् । किं पुनर्लिङ्गम् । कश्च

(१) अयं श्लोको नास्ति द्वितीयपुस्तके। (२) परमार्थसत् इति पाठः गौरीकान्तसम्मतः। परमार्थसत् अलीकभिन्नम् स्वं घटादिव्यक्तिः तल्लक्षणः तत्स्वरूपः विषयो यस्य तादृशं निर्विकल्पकं प्रत्यक्षप्रमा भवतु इत्यर्थः। हेतुगर्भविशेषणम् इति गौरीकान्तसार्वभौमाः।

तस्य परामर्शः । उच्यते । व्याप्तिबलेनार्थगमकं लिङ्गम् । यथा । धूमोऽग्नेर्लिङ्गम्[1] । तथाहि । यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः । तस्यां गृहीतायामेव धूमोऽग्निं गमयति । अतो व्याप्तिबलेनाग्न्यनुमापकत्वात् धूमोऽग्नेर्लिङ्गम् । तस्य तृतीयं ज्ञानं परामर्शः[2] । तथाहि । प्रथमं तावन्महानसादौ भूयोभूयो धूमं पश्यन् वह्निं पश्यति तेन भूयोदर्शनेन धूमाग्न्योः स्वाभाविकं सम्बन्धमवधारयति यत्र धूमस्तत्राग्निरिति । यद्यपि यत्र[3] मैत्रीतनयत्वं तत्र श्यामत्वमपि इति भूयोदर्शनं समानमवगम्यते[4] तथापि मैत्रीतनयत्वश्यामत्वयोर्न स्वाभाविकसम्बन्धः किं त्वौपाधिक एव । शाकाद्यन्नपरिणामस्योपाधेर्विद्यमानत्वात् । तथाहि । श्यामत्वे मैत्री तनयत्वं प्रयोजकं न किं तु शाकाद्यन्नप-

---

(१) यथा धूमोऽग्नेर्लिङ्गम् इति नास्ति २ पु. । तथाच सामान्यविषयकं सविकल्पकं न प्रत्यक्षमित्यर्थः । कुतः । अनुगताकारावगाहित्वात् शब्दलिङ्गवत् तज्जन्यज्ञानवत् । एवञ्च यदनुगताकारावगाहि तन्न प्रत्यक्षप्रमा यथाशब्दलिङ्गजन्यज्ञानम् अनुगताकारावगाहि चेदं विवादाध्यासितं सविकल्पकमिति अनुगताकारावगाहित्वस्य प्रत्यक्षप्रमात्वाभावव्याप्यत्वे कार्य्यकारणभावमूलानुकूलतर्कं स्मारयति । अर्थजस्यैवेति । व्यक्तिमात्रजन्यस्येत्यर्थः । अर्थस्येति । परमार्थसतो व्यक्तिरूपस्यैव तज्जनकत्वात् प्रमाजनकत्वात् इति गौरीकान्ताः । (२) लिङ्गपरामर्शः २ पु. । (३) यत्र यत्र २ पु. । (४) अवगम्यते इति नास्ति २ पु. ।

रिणतिभेद एव प्रयोजकः । प्रयोजकश्चोपाधिरित्युच्यते । न च धूमाग्न्योः सम्बन्धे कश्चिदुपाधिरस्ति । अस्ति चेत् योग्यो वाऽयोग्यः । अयोग्यस्य शङ्कितुमशक्यत्वात् योग्यस्य चानुपलभ्यमानत्वात् यत्रोपाधिरस्ति तत्रोपलभ्यते । [1]तथाग्नेर्धूमसम्बन्धे आर्द्रेन्धनसंयोगः । हिंसात्वस्याधर्मसाधनत्वेन सह सम्बन्धे निषिद्धत्वमुपाधिः । मैत्रीतनयत्वस्य च श्यामत्वेन सम्बन्धे शाकाद्यन्नपरिणतिभेदः । न चेह[2] धूमाग्निसाहचर्ये कश्चिदुपाधिरस्ति । यद्यभविष्यत् तदाऽद्रक्ष्यत् । ततो [3]दर्शनाभावान्नास्तीति तर्कसहकारिणानुपलम्भसनाथेन प्रत्यक्षेणैवोपाध्यभावोऽवधार्यते । तथाहि उपाध्यभावग्रहणजनितसंस्कारसहकृतेन भूयोदर्शनजनितसंस्कार[4]सहकृतेन साहचर्यग्राहिणा प्रत्यक्षेणैव धूमाग्न्योर्व्याप्तिरवधार्यते । तेन धूमाग्न्योः स्वाभाविक एव सम्बन्धः न त्वौपाधिकः । स्वाभाविकः[5] सम्बन्धो [6]व्याप्तिः । तदनेन न्यायेन धूमाग्न्योर्व्याप्तौ गृह्यमाणायां महानसे यद्धूमज्ञानं तत्प्रथमम् । पर्वतादौ पक्षे यद्धूमज्ञानं तद्द्वितीयम् । ततः पूर्वगृहीतां धूमाग्न्योर्व्याप्तिं स्मृत्वा यत्र [6]धूमस्तत्राग्निरिति पुनस्तत्रैव पर्वते धूमं प-

---

(१) यथा २ पु. । (२) नच २ पु. । (३) ततः इति नास्ति पु. । (४) दर्शनतत्संस्कार २ पु. । (५) स्वाभाविकश्च पु. । (६) यत्र धूमस्तत्राग्निरिति नास्ति २ पु. ।

रामृशति अस्त्यत्र पर्वतेऽग्निना व्याप्तो धूम इति तदिदं धूमज्ञानं तृतीयं। तच्चावश्यमभ्युपेयम् । अन्यथा यत्र धूमस्तत्राग्निरिति[1] इह तु कथमग्निना भवितव्यम् । तस्मादिहापि धूमोऽस्तीति ज्ञानमन्वेषितव्यम् । अयमेव लिङ्गपरामर्शः अनुमितिं[2]करणत्वाच्चानुमानम् । तस्मादस्त्यत्र पर्वतेऽग्निरित्यनुमितिरु[3]त्पद्यते। ननु कथं प्र[4]थमं महानसे यद्धूमज्ञानं तन्नाग्निमनुमापयति। सत्यम् । व्याप्तेरगृहीतत्वात् गृहीतायामेव व्याप्तौ अनुमित्युदयात् । अथ व्याप्तिनिश्चयोत्तरकालं महानसे एवाग्निरनुमीयताम् । मैवम् । अग्नेर्दृष्टत्वेन सन्देहस्यानुदयात्। सन्दिग्धश्चार्थोऽनुमीयते । तथोक्तं भाष्यकृता। नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते किं तु सन्दिग्धेऽर्थे[5] । अथ पर्वतगतमात्रस्य पुंसो यद्धूमज्ञानं तत् कथं नाग्निमनुमापयति । अस्ति चात्र सन्देहः साधकबाधकप्रमाणाभावेन संशयस्य न्यायप्राप्तत्वात् । सत्यम् । अगृहीतव्याप्तेरिव गृहीतविस्मृतव्याप्तेरपि पुंसोऽनुमानानुदयेन व्याप्तिस्मृतेरप्यनुमितिहेतुत्वात्। धूमदर्शनाच्चोद्भूत-

---

(१) इत्येव स्यात् २ पु. । (२) अनुमितिं प्रति २ पु. । (३) अनुमितिज्ञानम् २ पु. । (४) प्रथममिति नास्ति २ पु. । (५) इतीतिशेषः ।

संस्कारो व्याप्तिं स्मरति यो यो धूमवान् स सोऽग्निमान् यथा महानसइति। तेन धूमदर्शने जाते व्याप्तिस्मृतौ जातायां यद्धूमज्ञानं तत् ज्ञानं तृतीयं धूमवांश्चायमिति। तदेवाग्निमनुमापयति नान्यत्। तदेवानुमानं। स एव लिङ्गपरामर्शः। तेन व्यवस्थितमेतल्लिङ्गपरामर्शोऽनुमानमिति। तच्चानुमानं द्विविधम्। स्वार्थं परार्थं चेति। स्वार्थं स्वप्रतिपत्तिहेतुः। यथाहि स्वयमेव महानसादौ विशिष्टेन प्रत्यक्षेण धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ सन्दिहानः पर्वतवर्तिनीमविच्छिन्नमूलामभ्रंलिहां धूमलेखां पुनःपुनः पश्यन् धूमदर्शनाच्चाग्नावुद्भूतसंस्कारो व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति। ततोऽत्रापि धूमोस्तीति प्रतिपद्यते तस्मादत्र पर्वतेऽग्निरस्तीति स्वयमेव प्रतिपद्यते तत् स्वार्थानुमानम्। यत्तु कश्चित् स्वयं धूमादग्निमनुमाय परं बोधयितुं पञ्चावयवमनुमानवाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। तद्यथा पर्वतोऽयमग्निवान् धूमवत्त्वात् यो यो धूमवान् स सोऽग्निमान् यथा महानसः तथा चायं तस्मात्तथेति। अनेन वाक्येन

---

(१) उद्भूतसंस्कार इति नास्ति २ पु.। (२) असावसौ २ पु.। (३) पुनःपुनः नास्ति २ पु.। (४) उद्बुद्ध २ पु.। (५) पंचावयववाक्यं प्रयुंक्ते इत्यस्यैव सम्यक्त्वेऽनुमानशब्दोल्लेखस्य प्रयोजनं केशवमिश्रा एव जानन्ति।

[1]प्रतिज्ञादिमता प्रतिपादितार्थात् पञ्चकरूपोपपन्नाल्लिङ्गात्परोप्यग्निं प्रतिपद्यते तेनैतत्परार्थमनुमानम् । अत्र पर्वतस्याग्निमत्त्वं साध्यं । धूमवत्त्वं हेतुः । सो[2]ऽन्वयव्यतिरेकी । अन्वयेन व्यतिरेकेण च [3]व्याप्तिमत्त्वात् । तथाहि । यत्र यत्र धूमवत्त्वं तत्र तत्राग्निमत्त्वं यथा महानसे इ[4]यमन्वयव्याप्तिः । महानसे धूमाग्न्योरन्वयसद्भावात्[5] । एवं यत्राग्निर्नास्ति तत्र धूमोऽपि नास्ति यथा जलह्र[6]द इति व्यतिरेकव्याप्तिः । महाह्रदे धूमाग्न्योर्व्यतिरेकस्य[7] सद्भावदर्शनात् । व्यतिरेकव्याप्तेस्त्वयं क्रमः । [8]अन्वयव्याप्तौ यद् व्याप्यं तदभावोत्र व्यापकः । यत्तु व्यापकं तदभावोत्र व्याप्य इति । तदुक्तम्[9] ।

> अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते ।
> साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः ।
> व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते ।
> तयोरभावयोस्तस्माद्विपरीतः प्रतीयते ॥

---

(१) प्रतिज्ञादिमता इति नास्ति २ पु. । (२) सच २ पु. । (३) व्याप्तेः २ पु. । (४) इति २ पु. । (५) सद्भावदर्शनात् २ पु. (६) महाह्रदः २ पु. । (७) व्यतिरेकस्याभावस्य २ पु. । (८) अन्वयव्याप्तौ इति नास्ति २ पु. । (९) व्याप्यं तु गमकं प्रोक्तं व्यापकं गम्यमिष्यते । तदुक्तम् । इत्यधिकम् २ पु. । अन्वयेसाधनं इति प्रथमःश्लोकः एवं तृतीयोपि श्लोकः, ३ पुस्तके नास्ति ।

व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम् ।
एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः ॥

तदेवं धूमवत्त्वे हेतावन्वयेन व्यतिरेकेण च व्याप्तिरस्ति । यत्तु वाक्ये केवलमन्वयव्याप्तेरेव[१] प्रदर्शनम् तदेकेनापि चरितार्थत्वात् । तत्राप्यन्वयस्यावक्रत्वात् प्रदर्शनम् । ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगात् । ननु व्यतिरेकव्याप्तेरभावात् तदेवं धूमवत्त्वं हेतुरन्वयव्यतिरेकी । एवमन्येप्यनित्यत्वादौ साध्ये कृतकत्वादयो हेतवोन्वयव्यतिरेकिणो द्रष्टव्याः। कश्चिद्[२]हेतुः केवलव्यतिरेकी । तद्यथा।सात्मकत्वे साध्ये प्राणादिमत्त्वं हेतुः।यथा[३] जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यत् सात्मकं न भवति तत् प्राणादिमन्न भवति यथा घटः । न चेदं जीवच्छरीरं तथा तस्मात्तथेति । अत्र हि जीवच्छरीरं पक्षः। तस्य सात्मकत्वं साध्यं।प्राणादिमत्त्वं हेतुः।स केवलव्यतिरेकी अन्वयव्याप्तेरभावात्। तथाहि । यत् प्राणादिमत् तत् सात्मकं यथा अमुकमिति दृष्टान्तो नास्ति ।जीवच्छरीरं सर्वं पक्ष एव लक्षणमपि। केवलव्यतिरेकी हेतुः यथा गन्धवत्त्वं पृथिवीलक्षणं विवादपदं पृथिवीति व्यवहर्त[४]-

---

(१) व्याप्तिरेव प्रदर्श्यते २ पु.। (२) कश्चिदन्यः २ पु.। (३) तथाहि २ पु.। (४) इति व्यवहर्त्तव्यमिति नास्ति २ पु.।

व्यम् गन्धवत्त्वात् यन्न पृथिवीति [1]व्यवह्रियते तन्न गन्धवत् यथा आपः प्रमाणलक्षणं वा। यथा प्रमाकरणत्वम्। तथाहि। प्रत्यक्षादिकं प्रमाणमिति व्यवहर्तव्यम् प्रमाकरणत्वात्। यत् प्रमाणमिति न व्यवह्रीयते तन्न प्रमाकरणं यथा प्रत्यक्षाभासः [2]न पुनस्तथेदं तस्मान्न तथेति। न पुनरत्र यत् प्रमाकरणं तत् प्रमाणमिति व्यवहर्तव्यम् यथा अमुकमिति दृष्टान्तो नास्ति प्रमाणमात्रस्य पक्षीकृतत्वात् अत्र च व्यवहारः साध्यः न तु प्रमाणत्वं तस्य प्रमाकरणत्वाद्धेतोरभेदेन साध्याभेददोषप्रसङ्गात्। तदेवं केवलव्यतिरेकिणो दर्शिताः।[3]कैश्चिद्धेतुः के[4]वलान्वयी। यथा शब्[5]दोऽभिधेयः प्रमेयत्वात् यत्प्रमेयं तत् अभिधेयं यथा घटः तथा चायं तस्मात्तथा अत्र[6] शब्दस्या[7]ऽभिधेयत्वं साध्यम्। प्रमेयत्वं हेतुः। स केवलान्वय्येव यदभिधेयं न भवति तत्प्रमेयमपि न भवति।

---

(१) व्यवह्रियते इति नास्ति २ पु.। (२) न पुनस्तथेदं तस्मान्नतथेति नास्ति ३। पु.। (३) कश्चिदन्यो हेतुः २ पु.। (४) केवलान्वयित्वं च वृत्तिमदत्यन्ताभावाप्रतियोगित्वम्। तच्च साध्यांशे बोध्यम्। घटोऽभिधेयः घटत्वादित्यत्रापि हेतोः केवलान्वयित्वात्। तथाच वृत्तिमदत्यन्ताभावाप्रतियोगिसाध्यकत्वं केवलान्वयित्वम् हेतौ। अस्तिच घटत्वे वृत्तिमान् योऽभावः घटाद्यभाव एव नत्वभिधेयत्वाभावः तस्य कुत्राप्यसत्त्वात् तादृशाभावप्रतियोगी घटः अप्रतियोगि अभिधेयत्वं तत्साध्यको हेतुर्घटत्वमिति। (५) विशेषः २ पु.। (६) इति इत्यधिकम् २ पु.। (७) विशेषस्य २ पु.।

यथाऽमुकमिति[1] व्यतिरेकेण दृष्टान्ताभावात् सर्वत्र हि प्रामाणिक एव दृष्टान्तः[2]। सच प्रमेयोभिधेयश्चेति। एतेषां चान्वयव्यतिरेकिकेवलान्वयिकेवलाव्यतिरेकिहेतूनां त्रयाणां मध्ये यो हेतुरन्वयव्यतिरेकी स पंचरूपोपपन्न एव साध्यं[3] साधयितुं क्षमते नत्वेकेनापि रूपेण हीनः। तानि तु पंचरूपाणि पक्षधर्मत्वं सपक्षेसत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति। एतानि तु पंचरूपाणि धूमवत्त्वादौ हेतावन्वयव्यतिरेकेण विद्यन्ते। तथाहि। धूमवत्त्वं पर्वतस्य पक्षस्य धर्मः पर्वते तस्य विद्यमानत्वात्। एवं सपक्षे सत्त्वं। सपक्षे महानसे विद्यत इत्यर्थः। एवं विपक्षात् व्यावृत्तिर्महाह्रदात्। तत्र नास्तीत्यर्थः। एवमबाधितविषयं च[4] धूमवत्त्वम्। तथाहि। धूमवत्त्वस्य हेतोर्विषयः साध्यधर्मः। तच्चाग्निमत्त्वं केनापि प्रमाणेन न बाधितं। न खंडितमित्यर्थः। एवमसत्प्रतिपक्षत्वं[5] असन्प्रतिपक्षो यस्येत्यसत्प्रतिपक्षं धूमवत्त्वं हेतुः। तथाहि। साध्यविपरीतसाधकं हेत्वंतरं प्रतिपक्ष इत्युच्यते। सच धूमवत्त्वे हेतौ नास्त्येवानुपलंभात्। तदेवं पंचरूपाणि धूमवत्त्वे हेतौ विद्यन्ते तेनैतद्धूमवत्त्वमाग्निमत्त्वस्य साधकम्[6]। अग्नेः पक्षधर्मत्वं हेतौ पक्ष-

---

(१) इति दृष्टान्तो नास्ति २ पु.। (२) एवार्थो दृष्टान्तः २ पु.। (३) स्वसाध्यम् २ पु.। (४) चकारो नास्ति २ पु.। (५) एवमसत्प्रतिपक्षत्वम् नास्ति २ पु.। (६) गमकम् २ पु.।

धर्मताबलात्सिध्यति[1] । तथाहि । अनुमानस्य[2] द्वे अंगे व्याप्तिः पक्षधर्मता च । तत्र व्याप्त्या साध्यसामान्यसिद्धिः । पक्षधर्मताबलात्साध्यस्य पक्षसंबन्धित्वं विशेषः सिध्यति । पर्वतधर्मेण धूमवत्त्वेन वह्निरपि पर्वतसंबन्धी[3] एवानुमीयते । अन्यथा साध्यसामान्यस्य[4] व्याप्तिग्रहादेव सिद्धेः कृतमनुमानेन । यस्त्वन्योप्यन्वयव्यतिरेकी हेतुः स सर्वः पंचरूपोपपन्न एव सन् हेतुः[5] । अन्यथा हेत्वाभासः । अहेतुरिति यावत् । केवलान्वयी चतूरूपोपपन्न[6] एव स्वसाध्यं साधयति । तस्यहि विपक्षव्यावृत्तिर्नास्ति विपक्षाभावात् । केवलव्यतिरेकी चतूरूपोपपन्न एव[7] । तस्य हि सपक्षे वृत्तिर्नास्ति[8] सपक्षाभावात् । के पुनः पक्षसपक्षविपक्षाः उच्यंते । संदिग्धसाध्यधर्माधर्मी[9] पक्षः । यथा धूमानुमाने पर्वतः पक्षः[10] । सपक्षः निश्चित[11]साध्यधर्माधर्मी । यथा महानसः धूमानुमाने । विपक्षस्तु निश्चि-

---

(१) विशेषः सिद्ध्यति २ पु. । (२) अनुमानस्य द्वयं साध्यम् सामान्यं विशेषश्चेति इत्यधिकम् २ पु. । (३) बहुव्रीहिरयम् । (४) साध्य इति नास्ति २ पु. । (५) सद्धेतुः । (६) युक्तः २ पु. एवमग्रेऽपि । (७) स्वसाध्यं साधयति इत्यधिकम् २ पु. । (८) सत्वम् २ पु. । (९) सन्दिग्धः साध्यरूपो धर्म्मो यत्र सन्दिग्धसाध्यधर्माएवं भूतो धर्मी पक्षः विशेष्यतासम्बन्धेन साध्यसन्देहवत्त्वं पक्षत्वमिति फलितम् । (१०) पक्षः इति नास्ति २ पु. । (११) तथाच यथोक्तरीत्या समासे विशेष्यतासम्बन्धेन साध्यनिश्चयवत्त्वं पर्य्यव-

तसाध्याभाववान् धर्मी । यथा तत्रैव महाह्रद इति । तदेवमन्वय-व्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिणो दर्शिताः । अतोऽन्ये हेत्वाभासाः[1] । तेच असिद्धविरुद्धानैकांतिकप्रकरणसमकालात्ययापदिष्टभेदात् पञ्चैव । तत्र लिङ्गत्वेनानिश्चितपक्षवृत्तिरसिद्धः स[2] त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत् । अत्र गगनारविंदमाश्रयः सच नास्त्येव । स्वरूपासिद्धो यथा अनित्यः शब्दः चाक्षुषत्वात् । अत्र चाक्षुषत्वं हेतुः स च शब्दे नास्त्येव । तस्य श्रावणत्वात् । व्याप्यत्वासिद्धस्तु द्विविधः। एको व्याप्तिग्राहकप्रमाणाभावमात्रात्[3] अपरस्तु उपाधिसद्भावात् ।

-सितम् । एवमग्रेऽपि । विशेष्यतासम्बन्धेन साध्याभावनिश्चयवत्त्वं विपक्षत्वमिति यथाश्रुतशब्दतो लभ्यते । विस्तरभयान्नेह विचार्य्यते ।

(१) हेतुलक्षणरहिताः हेतुवदाभासमाना इति ३ पु । यद्विषयकनिश्चयसामान्यं प्रकृतानुमितिंप्रतिबध्नाति तत्वं हेत्वाभासत्वमिति हेत्वाभाससामान्यदोषलक्षणम् । तद्वान्हेतुर्हेत्वाभासः प्रकृतानुमितिपदं च साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारकानुमितिपरम् तेन व्यभिचारादिज्ञानस्य साक्षादनुमित्यप्रतिबन्धकत्वेऽपि न तत्राव्याप्तिः । यद्वा यादृशपक्षसाध्यकहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वं तत्र दोषत्वं । एकमात्रदोषस्थले तत्वमेव । पञ्चोक्तिस्तु तत् सम्भवस्थलाभिप्रायेणेति संक्षेपः । (२) तत्रासिद्धः त्रिविधः६ पु. । (३) प्रमाणाभावात्२पु. ।

तत्र प्रथमो यथा । शब्दः क्षणिकः सत्वात् यत्सत् तत् क्षणिकं यथा जलधरपटलम् तथाच शब्दादिरिति । नच सत्वक्षणिकत्वयोर्व्याप्तिग्राहकं प्रमाणमस्ति । सोपाधिकतया सत्वस्य व्याप्यत्वासिद्धावुच्यमानायां क्षणिकत्वमन्यप्रयुक्तमित्युपगतं स्यात् । द्वितीयो यथा क्रत्वंतरवर्तिनी हिंसा अधर्मसाधनं हिंसात्वात् क्रतुबाह्यहिंसावत् अत्र ह्यधर्मसाधनत्वे हिंसात्वं न प्रयोजकम् किंतु निषिद्धत्वमेव । प्रयोजकश्चोपाधिरिति यावत् । तथाहि । साध्यव्यापकत्वे सति साधनाव्यापक उपाधिरित्युपाधिलक्षणम् । तच्चास्ति निषिद्धत्वे निषिद्धत्वं हि साध्यस्याधर्मसाधनत्वस्य व्यापकं । यतः यत्र यत्राधर्मसाधनत्वं तत्रावश्यं निषिद्धत्वमपीति । एवं साधनं हिंसात्वं न व्याप्नोति निषिद्धताम् । नहि यत्रयत्र हिंसात्वं तत्रावश्यं निषिद्धत्वं आग्नीषोमीयहिंसायां अनिषिद्धत्वात् । तेन अन्यप्रयुक्तव्याप्त्युपजीविहिंसात्वं व्याप्यत्वासिद्धमेव । साध्यविपर्ययव्याप्तो

(१) साध्यसाधनपदे तत्त्वाभिमतपरे सोपाधिकस्थले साध्यत्वसाधनत्वयोरभावात् इति गौरीकान्ताः । (२) यज्ञीयपशुहिंसायाम् २ पु. ।

हेतुर्विरुद्धः । स यथा शब्दो नित्यः कृतकत्वात् आत्मवत् कृतकत्वं हि साध्यं यन्नित्यत्वं तद्विपरीतानित्यत्वेन व्याप्तम्[3] । अतो विरुद्धं कृतकत्वमिति । सव्यभिचारोऽनैकांतिकः । स द्विविधः । साधारणानैकांतिकोऽसाधारणानैकांतिकश्चेति । तत्र पक्षसपक्षविपक्षवृत्तिः साधारणः । स यथा । शब्दो नित्यः प्रमेयत्वात् व्योमवत् । अत्र हि प्रमेयत्वं हेतुः सतु नित्यानित्यवृत्तिः । सपक्षविपक्षव्यावृत्तः पक्ष एव वर्तमानो यः सोऽसाधारणानैकांतिकः । स यथा । भूर्नित्या गंधवत्त्वात् गंधवत्त्वं हि सपक्षान्नित्याद्विपक्षाच्चानित्याद्व्यावृत्तं किंतु भूमिमात्रवृत्ति । यस्य हेतोः साध्यविपरीतसाधकं हेत्वंतरं विद्यते स प्रकरणसमः।स यथा । शब्दोऽनित्यः नित्यधर्मानुपलब्धेरिति शब्दो नित्यः अनित्यधर्मरहितत्वात् । अयमेव हि सत्प्रतिपक्ष इत्युच्यते । पक्षे प्रमाणांतरावधृतसाध्याभावो हेतुः बाधितविषयः कालात्ययापदिष्ट इत्युच्यते । यथा अग्निरनुष्णः कृतकत्वाज्जलवत् । तत्र हि कृतकत्वस्य हेतोः

---

(१) व्याप्तस्तु विरुद्धः २ पु. (२) अत्र इत्यधिकम् २ पु. । (३) यत् कृतकं तदनित्यमेव न नित्यमिति इत्यधिकम् २ पु. । (४) यच्च त्रयवृत्ति २ पु. । (५) स इत्यधिकम् पु. । (६) पदार्थत्वात् २ पु. । (७) पदार्थत्वस्य २ पु. ।

साध्यमनुष्णत्वं तदभावः प्रत्यक्षेणैवावधारितः। स्पार्शनप्रत्यक्षेणैवोष्णत्वोपलंभात् ॥०॥ इति व्याख्यातमनुमानम् ॥ अतिदेशवाक्यार्थस्मरणसहकृतं[1] गोसादृश्यविशिष्टपिण्डज्ञानमुपमानम्। यथा गवयमजानन्नपि यथा गौस्तथा गवय इति कुतश्चिदारण्यकपुरुषाच्छ्रुत्वा वनं गतो वाक्यार्थं स्मरन्[2] यदा गोसादृश्यविशिष्टं पिण्डं पश्यति तदा तद्वाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपिण्डज्ञानमुपमानमुपमितिकरणत्वात्। गोसादृश्यविशिष्टपिण्डज्ञानानंतरमयमसौ गवयशब्दवाच्यपिंड इति संज्ञासंज्ञिसंबंधप्र[3]तिपत्तिः। सैव फलं। इदं तु प्रत्यक्षानुमानासाध्यप्रमासाधकत्वात्प्रमाणांतरमुपमानमस्ति ॥ इति व्याख्यातं चोपमानम् ॥ आप्तवाक्यं शब्दः। आप्तस्तु यथा भूतस्य अर्थस्योपदेष्टा पुं[4]रुषः। वाक्यं तु आकांक्षायोग्यतासन्निधिमतां पदानां समूहः। अतएव गौरश्वः पुरुषो हस्तीति पदानि न वाक्यम्। परस्प-

---

(१) स्मरणसहकृतत्वं व्यापारविधया। गोसादृश्येति। इदं च यत्किञ्चिल्लक्ष्यप्रदर्शनाय तेन वैधर्म्योपमाने नाव्याप्तिः। लक्षणं तु यां काञ्चिदुपमितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुमित्यसमवेतजातिमदुपमितिकरणत्वमुपमानत्वं बोध्यम्। तादृशी जातिरुपमितित्वम्। करणं तु क्वचित् साधर्म्यविशिष्टज्ञानं क्वचित् वैधर्म्यविशिष्टज्ञानं व्यापारः अतिदेशवाक्यार्थस्मृतिः। (२) इदं स्मरणमेव व्यापारः। (३) प्रतीतिः २ पु.। (४) उपदेष्टातात्प-

राकांक्षाविरहात्। अग्निना सिंचेदिति न वाक्यम् योग्यताविरहात् नह्यग्निसेकयोः परस्परान्वययोग्यताऽस्ति। तथाहि। अग्निनेति तृतीयया सेकरूपं कार्यं प्रति कारणत्वमग्नेः प्रतिपाद्यते। न चाग्निः सेके करणीभवितुं योग्यः। तेन कार्यकारणभावलक्षणसंबंधे अग्निसेकयोरयोग्यत्वादग्निना सिञ्चेदिति न वाक्यम्। एवमेकैकशः प्रहरेप्रहरे असहोच्चारितानि गामानयेत्यादिपदानि न वाक्यम्। सत्यामपि परस्पराकांक्षायां सत्यामपि परस्परान्वययोग्यतायां परस्परसान्निध्याभावात्। यानितु साकांक्षाणि योग्यतावंति स-

---

र्यवान् प्रकृतवाक्यार्थप्रतिपादनेच्छावानित्यर्थः इति गौरीकान्तैर्व्याख्यातम्। तथाच प्रकरणज्ञानानामननुगततया तात्पर्यज्ञानमपि शाब्दबोधहेतुरिति। वस्तुतः समानानुपूर्वीकस्यैव वाक्यान्तरस्य तस्यैव वा कालान्तरमन्तर्भाव्य घटमिति वाक्ये घटीयकर्मत्वादिपरत्वनिश्चयसत्वेपि श्रूयमाणवाक्यव्यक्तौ इदानीमन्तर्भावेण तत्परत्वस्यानिश्चये तत्परत्वाभावनिश्चये वा घटीयं कर्म्मत्वमित्यन्वयमतेरनुत्पादात् विशिष्यैव तत्तद्वाक्यव्यक्तिधर्मिकस्य घटकर्म्मत्वादिपरत्वनिश्चयस्य तत्तदन्वयबोधहेतुत्वं स्वीकरणीयम्। एवञ्च तात्पर्य्यज्ञानमपि यदि विशेषरूपेण हेतुतां विना न निर्वहति तदा तत्तद्धेतुभूतानां प्रकरणज्ञानाभिधानामेव विज्ञानव्यक्तीनां हेतुत्वमुचितम्। अवश्यक्लृप्तनियतपूर्ववृत्तिताकत्वात् किमन्तर्गडुना तात्पर्यज्ञानेन। अतएव सैन्धवमानय इत्यादावपि नलवणपरत्वधीर्लवणान्वयबुद्धौ हेतुः किन्तु तदर्थकत्वेनाभिमतभोजनप्रकरणज्ञानमेवेति सिद्धान्तः।

(१) वाक्यत्वमिति नास्ति २ पु.। इति पदानि न वाक्यम् २ पु.।

(२) प्रतिपादितम् २ पु.।

न्निहितानि पदानि तान्येव वाक्यम् । यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि अथवा नदीतीरे पंचफलानि संति यथा वा तान्येव गामानयेत्यादिपदान्यविलंबोच्चरितानि[1]। नन्वत्र न पदानि साकाङ्क्षाणि किंत्वर्थाः फलादीनामाधेयानां तीराद्याधाराकाङ्क्षितत्वात्। न च विचार्यमाणे अर्था अपि साकांक्षाः आकांक्षाया इच्छात्मकत्वेन चेतनधर्मत्वात् । सत्यम् । अर्थास्तावत् स्वपदश्रोतरि अन्योन्यार्थविषयकाकांक्षा[2]जनकत्वेन साकांक्षा इत्युच्यंते तद्द्वारेण तत्प्रतिपादकानि पदान्यपि साकांक्षाणीत्युपचर्यन्ते ॥ यद्वा पदान्येवार्थान् प्रतिपाद्यार्थांतरविषयाकांक्षाज[3]नकानीत्युपचारात्साकांक्षाणि । एवमर्थाः साकांक्षाः परस्परान्वययोग्यास्तद्द्वारा पदान्यपि योग्यानीत्युच्यंते[4]। सन्निहितत्वं तु पदानामेकेनैव पुंसा अविलंबोच्चारितत्वम् । तच्च साक्षादेव पदेषु भवंति नार्थद्वारा । तेनायमर्थः संपन्नः । अर्थप्रतिपादनद्वारा श्रोतुः पदांतरविषयामर्थांतरविषयां वा आकांक्षां जनयतां प्रतीयमानपरस्परान्वययोग्यार्थप्रतिपादकानां सन्निहितानां पदानां समुदायो वाक्यम्। पदं च वर्णसमूहः। समूहश्चात्रैकज्ञान-

(१) अविलम्बिततत्वेनोच्चरितानि २ पु. । (२) अन्योन्यविषयाकाङ्क्षा २ पु. । (३) जनकत्वात्साकाङ्क्षाणि २ पु. । (४) पदानि परस्परान्वययोग्यान्युच्यन्ते २ पु. ।

विषयीभावः । एवंच[1] वर्णानां क्रमवतामाशुतरविनाशित्वेनैकदा-ऽनेकवर्णानुभवासम्भवात् पूर्वपूर्ववर्णाननुभूय अन्त्यवर्णश्रवण-काले पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतेन अन्त्यवर्णसंबन्धेन पदव्युत्पादनसमयग्रहानुगृहीतेन श्रोत्रेणैकदैव सदसदनेकवर्णा-वगाहिनी पदप्रतीतिर्जन्यते सहकारिदार्ढ्यात् प्रत्यभिज्ञानवत् । प्रत्यभिज्ञानप्रत्यक्षे[2] ह्यतीतापूर्वावस्था स्फुरत्येव । ततः पूर्वपूर्वप-दानुभवजनितसंस्कारसहकृतेन अन्त्यपदविषयेण श्रोत्रेन्द्रियेण पदार्थप्रत्ययानुगृहीतेनानेकपदावगाहिनी वाक्यप्रतीतिः क्रियते यदिदं[3] वाक्यमाप्तपुरुषेण प्रयुक्तं शब्दनामकं प्रमाणं । फलं त्वस्य वाक्यार्थज्ञानं।तच्चैतच्छब्दप्रमाणलक्षणं लोके वेदे च समानम्[4]। लोके त्वयं विशेषः।कश्चिदेवाप्तो भवति न सर्वः। अतः किंचिदेव लौकिकं वाक्यं प्रमाणम् यदाप्तवक्तृकम्। वेदे तु परमाप्ततमश्रीमहेश्वरेण कृतं सर्वमेव वाक्यं प्रमाणम्। सर्वस्यैवाप्तवाक्यत्वात्। वर्णितानि चत्वारि प्रमाणानि । एतेभ्योन्यन्नप्रमाणम् प्रमाणस्य सतोऽत्रैवान्तर्भा-वात् । नन्वार्थापत्तिरपि पृथक्प्रमाणमस्ति अनुपपद्यमानार्थद-र्शनात्तदुपपादकीभूतार्थांतरकल्पनमर्थापत्तिः । तथाहि । पीनो

(१) एवं तत्र २ पु. । (२) अपिइत्यधिकम् २ पु. । (३) त-दिदम् २ पु. । (४) साधारणम् २ पु. ।

देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा रात्रिभोजनं कल्प्यते। दिवा अभुंजानस्य पीनत्वं रात्रिभोजनमन्तरेण नोपपद्यते अतः पीनत्वान्यथानुपपत्तिप्रसूतार्थापत्तिरेव रात्रिभोजने प्रमाणम्। तच्च प्रत्यक्षादिभ्यो भिन्नं रात्रिभोजनस्य प्रत्यक्षाविषयत्वात्। नैतत्।रात्रिभोजनस्यानुमानविषयत्वात्।तथाहि।अयं देवदत्तो रात्रौ भुंक्ते दिवा अभुंजानत्वे सति पीनत्वात् यस्तु न रात्रौ भुंक्ते नासौ दिवा अभुंजानत्वे सति पीनः यथा दिवारात्रावभुंजानो अपीनः नचायं तथा तस्मान्न तथेति केवलव्यतिरेक्यनुमानेनैव रात्रौ भोजनस्य प्रतीयमानत्वात्किमर्थमर्थापत्तिः कल्पनीया। नन्वभावाख्यमपि पृथक्प्रमाणमस्ति। त[1]च्चाभावग्रहणायांगीकरणीयं। तथाहि।घटाद्यनुपलब्ध्या घटाद्यभावोनिश्चीयते।अनुपलब्धिश्चोपलब्धेरभावः इत्यभावप्रमाणेन घटाद्यभावो गृह्यते। नैतत्। यद्यत्र घटोऽभविष्यत्तर्हि भूतलमिवाद्रक्ष्यत् इति तर्कसहकारिणाऽनुपलंभसनाथेन प्रत्यक्षेणैवाऽभावग्रहणात्। नन्विन्द्रियाणि संबंधार्थग्राहकाणि।तथाहि।इन्द्रियाणि वस्तुप्राप्यप्रकाशकानि ज्ञानकरणत्वादालोकवत्[2]।यद्वा चक्षुःश्रोत्रे [3]प्राप्यकारिणीइन्द्रियत्वात् त्वगिन्द्रियवत्। त्वगादीनां तु प्राप्यकारित्वमुभयवादिसिद्धमेव

(१) प्रमाणान्तरम् २ पु.। (२) यद्वाइंद्रियाणि वस्तुप्राप्यकारीणि करणत्वात् कुठारवत् इति ३ पु.। (३) वस्तुप्राप्यप्रकाशकारिणी वाह्येन्द्रियत्वात् २ पु.।

न चेंद्रियाभावयोः सम्बन्धोऽस्ति । संयोगसमवायौ हि संबंधौ न तौ तयोस्तः । द्रव्ययोरेव संयोग इति नियमात् । अभावस्य च द्रव्यत्वाभावात् । अयुतसिद्धत्वाभावान्न समवायोऽपि । विशेषण-विशेष्यभावश्च संबंध एव न भवति भिन्नोभयाश्रितैकत्वाभावात् । संबंधो हि संबंधिभ्यां भिन्नो भवति उभयाश्रितश्चैकश्च । यथा भेरीद-ण्डयोः संयोगः सहि भेरीदंडाभ्यां भिन्नस्तदुभयाश्रितश्चैकश्च । न च विशेष्यविशेषणभावस्तथा । तथाहि । दण्डपुरुषयोः विशेषणविशेष्य-भावो न ताभ्यां भिद्यते । नहि दण्डस्य विशेषणत्वमर्थान्तरम् पुरुषस्य विशेषत्वमर्थांतरम् । अपि तु स्वरूपमेव अभावस्यापि विशेषणत्वात् विशेष्यत्वाच्च । नचाभावे कस्यचित्पदार्थस्य द्रव्याद्यन्यतमस्य संब-न्धः तस्मादभावस्य स्वोपरक्तबुद्धिजनकं यत्स्वरूपं तदेव विशेषणम् नतुतदर्थांतरम् एवं व्याप्यव्यापकत्वकार्यकारणत्वादयोप्यूह्याः । स्वप्रतिबद्धबुद्धिजनकत्वं स्वरूपमेव हि व्यापकत्वमद्यादीनाम् कारणत्वमपि कार्यानुकृतान्वयव्यतिरेकिस्वरूपमेवहि तत्वा-दीनां नत्वर्थांतरम् अभावस्यापि व्यापकत्वात्कारणत्वाच्च नह्य-भावे सामान्यादिसंभवः तदेवं विशेषणविशेष्यभावो न विशेष-णविशेष्यस्वरूपाभ्यां भिन्नः नाप्युभयाश्रितः विशेषणे विशेष-

(१) उभयसिद्धमेव २ पु. । (२) तावाश्रितश्च २ पु. । (३) विशेष्यत्वाचेति नास्ति २ पु. । (४) भावरूपाभ्याम् २ पु. ।

णभावमात्रस्य सत्वात् विशेष्यभावस्याभावात् विशेष्ये च विशेष्यभावमात्रस्य सत्वात् विशेषणभावस्याभावात् । नाप्येकः विशेषणं च विशेष्यं च तयोर्भावइति द्वन्द्वान्ते श्रूयमाणो भावशब्दः प्रत्येकमभिसंबध्यते। तथाच विशेषणभावो विशेष्यभावश्चेत्यापन्नं[2] ॥ द्वावेतौ । एकश्च संबंधः । तस्माद्विशेषणविशेष्यभावो न संबंधः । एवं व्याप्यव्यापकभावादयोपि । संबंधशब्दप्रयोगस्तु उभयनिरूपणीयत्वसाधर्म्येणोपचारात् । तथाचासंबद्धस्याभावस्येन्द्रियेण ग्रहणं न भवति । सत्यम् । भावावच्छिन्नत्वात् व्याप्तेः भावं प्रकाशयदिन्द्रियं प्राप्तमेव प्रकाशयति। नच[3]भावमपि अभावं प्रकाशयदिंद्रियं विशेषण[4]मुखेनैवेति सिद्धांतः ॥ असंबद्धाभावग्रहे हि अतिप्रसंगदोषस्तु विशेषणतयैव निरस्तः ॥ समश्चपरमते। यत्रोभयोः समो दोषः परिहारोपि वा समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे । इदमिदानीं निरूप्यते। जलादिज्ञाने जाते तस्य प्रामाण्यमवधार्य कश्चिज्जलादौ प्रवर्तते कश्चित्संदेहादेव प्रवृत्तः। प्रवृत्त्युत्तरकालं जलादिप्रतिलंभे सति प्रामाण्यमवधारयतीति वस्तुगतिः । अत्र क-

(१) द्वन्द्वात्परः २ पु. । (२) आपन्नम् २ पु. । (३) नहि २ पु. । (४) विशेषणविशेष्य २ पु. ।

श्चिदाह। प्रागेव प्रवृत्तेः प्रामाण्यमवगम्य पुरुषः प्रवर्तते स्वत एव प्रामाण्यावधारणात् । अस्यार्थः । येनैव ज्ञानं गृह्यते तेनैव तद्गतं प्रामाण्यमपि नतु ज्ञानग्राहकादन्यत् ज्ञानधर्मप्रामाण्यग्राहकं । तेन ज्ञानग्राहकातिरिक्तानपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्य । ज्ञानं च प्रवृत्तेः पूर्वमेव गृहीतं । कथमन्यथा प्रामाण्याप्रामाण्यसंदेहोपि स्यात् । अनवगते धर्मिणि संदेहानुदयात् । तस्मात्प्रवृत्तेःपूर्वमेव ज्ञाततान्यथानुपपत्तिप्रसूतया अर्थापत्त्या ज्ञाने गृहीते ज्ञानगतं प्रामाण्यमपि अर्थापत्त्यैव गृह्यते । ततः पुरुषः प्रवर्तते । न तु ज्ञानमात्रं प्रथमं गृह्यते । ततः प्रवृत्त्युत्तरकालं फलदर्शनेन ज्ञानस्य प्रामाण्यमवधार्यते । अत्रोच्यते। ज्ञाततान्यथानुपपत्तिप्रसूतया अर्थापत्त्या ज्ञानं गृह्यते इति यदुक्तं तदेव वयं न मृष्यामहे । तया प्रामाण्यग्रहस्तु दूरत एव । तथाहि । इदं किल परस्याभिमतं। घटादिविषये ज्ञाने जाते मया ज्ञातोऽयं घट इति घटस्य ज्ञातता प्रतिसंधीयते । तेन ज्ञाने जाते सति ज्ञाततानाम कश्चिद्धर्मो जात इत्यनुमीयते। साच ज्ञानात्पूर्वमजातत्वात् ज्ञाने जाते च जातत्वादन्वयव्यतिरेकाभ्यां ज्ञानेन जन्यत इति अवधार्यते ॥ एवं ज्ञानजन्योसौ ज्ञातता नाम धर्मो ज्ञानमंतरेण नोपपद्यते। कारणाभावे कार्यानुदयात् । तेनार्थापत्त्या

(१) प्रामाण्यमवधार्य्य २ पु. ।

स्वकारणं ज्ञानं ज्ञाततया आक्षिप्यत इति। न चैतद्युक्तम्। ज्ञानविषयातिरिक्ताया ज्ञातताया अभावात्। ननु ज्ञानजनितज्ञातताधारत्वमेवहि घटादेर्ज्ञानविषयत्वं। तथाहि। न तावत्तादात्म्येन। विषयविषयिणोः घटज्ञानयोस्तादात्म्यानभ्युपगमात्। तदुत्पत्त्या तु विषयत्वे इन्द्रियादेर्विषयत्वापत्तिः इन्द्रियादेरपि तस्य ज्ञानस्योत्पत्तेः। तेनेदमनुमीयते[1]॥ ज्ञानेन घटे किंचिज्जन्यते[2] येन घट एव तस्य ज्ञानस्य विषयो नान्य इत्यतो विषयत्वान्यथानुपपत्तिप्रसूतयार्थापित्त्यैव ज्ञाततासिद्धिः न प्रत्यक्षमात्रेण। मैवम्। स्वभावादेव विषयिविषयतोपपत्तेः। अर्थज्ञानयोरेतादृश एव स्वाभाविको विशेषः। येनानयोर्विषयविषयिभावः। इतरथातीतानागतयोर्विषयत्वं न स्यात्। ज्ञानेन तत्र ज्ञातताजननासंभवात्। असति धर्मिणि धर्मजननायोगात्। किंच ज्ञातताया अपि स्वज्ञानविषयत्वात् तत्रापि ज्ञातताप्रसंगः। तथाचानवस्था। अथ ज्ञाततांतरमंतरेणापि स्वभावादेव ज्ञानविषयत्वं ज्ञातताया:। एवं चेत्तर्हि घटादावपि किं ज्ञाततयेति। अस्तुवा ज्ञातता तथापि न तन्मात्रेण ज्ञानं गृह्यते[3]। अतो ज्ञाततविशेषणप्रमाणज्ञानाव्यभिचारिणा प्रामाण्यमिति कुत एव ज्ञानग्राहकग्राह्यताप्रामाण्यस्य। अथ केनचित्

(१) उन्नीयते २ पु.। (२) जनितम् २ पु.। (३) ज्ञातं गम्यते २ पु.।

ज्ञाततविशेषेण प्रमाणज्ञानाव्यभिचारिणा ज्ञानप्रामाण्ये सहैव गृह्येते । एवं चेत् अप्रामाण्येऽपि शक्यमिदं वक्तुं । केनचित् ज्ञाततविशेषेणाप्रमाणज्ञानाव्यभिचारिणा ज्ञानाप्रामाण्ये सहैव गृह्येते इत्यप्रामाण्यमपि स्वत एव गृह्यते । अथैवमप्यप्रामाण्यं परतः तर्हि प्रामाण्यमपि परत एव गृह्यतां[1] । ज्ञानग्राहकादन्येनेत्यर्थः[2] । ज्ञानं हि मानसप्रत्यक्षेण गृह्यते प्रामाण्यं पुनरनुमानेन । तथा हि । जलज्ञानानंतरं जलार्थिनः प्रवृत्तिर्द्वेधा । फलवत्यफला च । तत्र फलवती या प्रवृत्तिः सा समर्था । तया तज्ज्ञानस्य याथार्थ्यलक्षणं प्रामाणमनुमीयते[3] । प्रयोगश्च । विवादाध्यासितं जलज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्वात् यन्न प्रमाणं न तत् समर्थां प्रवृत्तिं जनयति । यथा प्रमाणाभास इति केवलव्यतिरेकी । अत्र फलवत्प्रवृत्तिजनकं यज्जलज्ञानं तत्पक्षः । तस्य प्रामाण्यं साध्यं । यथार्थत्वमित्यर्थः । न तु प्रमाकरणत्वं स्मृत्यां व्यभिचारापत्तेः । हेतुस्तु समर्थप्रवृत्तिजनकत्वं । फलवत्प्रवृत्तिजनकत्वमिति यावत् । अनेन केवलव्यतिरेक्यनुमानेनाऽनभ्यासदशापन्नस्य ज्ञानस्य प्रामाण्ये बोधिते तेन दृष्टांतेन जलप्रवृत्तेः पूर्वमपि तज्जातीयत्वेन लिंगेनान्वयव्यतिरेक्यनुमानेनान्यस्य ज्ञानस्याभ्यासदशापन्नस्य प्रामाण्यमनुमीयते । तस्मात् प-

---

(१) गृह्यताम् २ पु. । (२) अन्यतः २ पु. । (३) याथार्थ्यलक्षणमवधार्यते २ पु. ।

रत एव प्रामाण्यं न ज्ञानग्राहकेणैव गृह्यते इति। चत्वार्येव प्रमाणानि युक्तिलेशोक्तिपूर्वकम् । केशवो बालबोधाय यथाशास्त्रमवर्णयत् ॥ इति प्रमाणग्रंथः समाप्तः ॥ ० ॥ अथ प्रमेयान्युच्यंते । आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति सूत्रम् । तत्रात्मत्वजातिमानात्मा । सच देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नः नित्यो विभुश्च।सच मानसप्रत्यक्षः विप्रतिपत्तौ तु बुद्ध्यादिगुणलिंगकः।तथाहि । बुद्ध्यादयस्तावद्गुणाःअनित्यत्वे सति एकेंद्रियमात्रग्राह्यत्वाद्रूपवत् । गुणास्तु गुण्याश्रिता एव।अत्र बुद्ध्यादयो गुणा न भूतानां। मानसप्रत्यक्षत्वात् ।ये हि भूतानां गुणास्ते न मनसा गृह्यंते। यथा रूपादयः। नापि दिक्कालमनसां गुणाः । विशेषगुणत्वात् । येहि दिक्कालादिगुणाः संख्यादयो न ते विशेषगुणाः । ते हि सर्वद्रव्यसाधारणगुणा एव। बुद्ध्यादयस्तु विशेषगुणाः।गुणत्वे सत्येकेन्द्रियग्राह्यत्वाद्रूपवत्।अतो न दिगादिगुणाः । तस्मादेभ्योष्टभ्योऽतिरिक्तो बुद्ध्यादीनां गुणानामाश्रयः प्रष्टव्यः[1] । सएवात्मा । प्रयोगश्च । बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात् । यस्तु पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितो न भवति । असौ पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणोऽपि न

(१) वक्तव्यः २ पु. ।

भवति। यथा रूपादि इति केवलव्यतिरेकी अन्वयव्यतिरेकी वा। तथाहि। बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात्। यो यदनाश्रितो गुणः स तदतिरिक्ताश्रितो भवति यथा पृथिव्याद्यनाश्रितः शब्दः पृथिव्याद्यतिरिक्ताकाशाश्रय इति। तथा च बुद्ध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्ताश्रयाः। तदेवं पृथिव्याद्यष्टद्रव्यातिरिक्तो नवमं द्रव्यमात्मा सिद्धः। स च सर्वत्र कार्योपलंभाद्विभुः। परममहत्परिमाणवानित्यर्थः। विभुत्वाच्च नित्योसौ व्योमवत्। सुखित्वादीनां वैचित्र्यात्प्रतिशरीरं भिन्नः। तस्य भोगायतनमन्त्यावयविशरीरं स्वसमवेतसुखदुःखान्यतरसाक्षात्कारो[1] भोगः। स च यदवच्छिन्ने आत्मनि जायते तद्भोगायतनं। तदेव शरीरं। चेष्टाश्रयो वा शरीरं। चेष्टा तु हिताहितप्राप्तिपरिहारार्था क्रिया। नतु स्पंदमात्रं। शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियं। अतीन्द्रियमिन्द्रियमित्युच्यमाने कालादेरपीन्द्रियत्वप्रसङ्गः। अतउक्तंज्ञानकारणमिति। तथापि इन्द्रियार्थसन्निकर्षेऽति प्रसङ्गः। अतउक्तं शरीरसंयुक्तमिति। शरीरसंयुक्तज्ञानकारणमित्युक्ते आलोकेऽपि इन्द्रियत्वप्रसङ्गः अतउक्तमतीन्द्रियमिति। तानि चेन्द्रियाणि षट्। घ्राणरसनचक्षुःश्रोत्रत्वङ्मनांसि। तत्र गन्धोपल-

(१) सुखदुःखानुभवइति २ पु.

ब्धिसाधनमिन्द्रियं घ्राणम्। नासाग्रवर्ति।तच्च पार्थिवम् गन्धवत्त्वात् यथाघटः। गन्धवत्त्वं च गन्धग्राहकत्वात्(१)। यदिन्द्रियं रूपादिषु पञ्चसु मध्ये यं गुणं गृह्णति तदिन्द्रियं तद्गुणवत्। यथा चक्षुः रूपग्राहकं रूपवत्। रसोपलब्धिसाधनमिन्द्रियं रसनम्। जिह्वाग्रवर्ति। तच्चाप्यम्। रूपादिषु पञ्चसु मध्ये रसस्यैवाभिव्यञ्जकत्वात् लालावत्। रूपोपलब्धिसाधनमिन्द्रियं चक्षुः। कृष्णताराग्रवर्ति। तच्च तैजसम्।रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकद्रव्यत्वात् प्रदीपवत्। स्पर्शोपलब्धिसाधनमिन्द्रियं त्वक्। सर्वशरीरव्यापि तत्तु वायवीयम्।रूपादिषु पञ्चसु मध्ये स्पर्शस्यैवाभिव्यञ्जकद्रव्यत्वात्। अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनवायुवत्। शब्दोपलब्धिसाधनमिन्द्रियं श्रोत्रम्। तच्च कर्णशष्कुल्यवच्छिन्नमाकाशमेव। न द्रव्यान्तरम्। शब्दगुणत्वात्। तदपि शब्दग्राहकत्वात् शब्दवत्। यदिन्द्रियं रूपादिषु पञ्चसु मध्ये यद् गुणव्यञ्जकं तत् तद्गुणसंयुक्तम्। यथा। चक्षुरादि रूपादिग्राहकं अतो रूपादियुक्तम्। शब्दग्राहकं च श्रोत्रम् अतः शब्दगुणकम्।

ननु चक्षुरादीन्द्रियसद्भावे किं प्रमाणम्। उच्यते। अनुमा-

---

(१) घ्राणं गंधवत्। रूपादिषु पंचसुमध्ये गंधस्यैवाभिव्यंजकत्वात् इत्यधिकं ३ पु।

नमेव । तथाहि । रूपाद्युपलब्धयः करणसाध्याः क्रियात्वात् छिदिक्रियावत् ।

अर्थाः षट्पदार्थाः । ते च द्रव्यगुणकर्मसामान्यविशेषसमवायाः । प्रमाणादयो यद्यपि अत्रैवान्तर्भवन्ति । तथापि प्रयोजनवशात् भेदेन कीर्तनम् । तत्र समवायिकारणं द्रव्यम् । गुणाश्रयो-वा । तानि च द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । तत्र पृथिवीत्वसामान्यवती पृथिवी । काठिन्यकोमलत्वादिनाऽवयवसंयोगविशेषेण युक्ता घ्राणशरीरमृत्पिण्डपाषाणवृक्षादिरूपा रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व[1]द्रवत्वसंस्कारवती । सा च द्विविधा । नित्याऽनित्या च । नित्या परमाणुरूपा । अनित्या च कार्यरूपा । द्विविधायाः पृथिव्याः रूपरसगन्धस्पर्शा अनित्याः पाकजाश्च । पाकस्तु तेजःसंयोगः तेन पृथिव्याः पूर्वरूपादयो नश्यन्ति अन्ये जन्यन्ते इति पाकजाः ।

अप्त्वसामान्ययुक्ता आपः । रसनेन्द्रियशरीर[2]सरित्समुद्रहिमकरकादिरूपाः । गन्धवर्जस्नेहयुक्तपूर्वोक्तगुणवत्यः । नित्या अनित्याश्च । नित्यानां रूपादयो नित्या एव[3] ॥

(१) द्रवत्वेति २ पु. नास्ति । (२) शरीरेति २ पु. नास्ति । (३) अनित्यानां रूपादयोऽनित्या एव इत्यधिकम् २ पु. ।

तेजस्त्वसामान्यवत्तेजः । चक्षुःशरीरसवितृसुवर्णवह्निविद्युदादिप्रभेदम् । रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत् । नित्यमनित्यं च पूर्ववत्, तच्चतुर्विधम् । उद्भूतरूपस्पर्शम्, अनुद्भूतरूपस्पर्शं अनुद्भूतरूपमुद्भूतस्पर्शम्, उद्भूतरूपमनुद्भूतस्पर्शम् । उद्भूतरूपस्पर्शं यथा[2]; सौरादितेजः पिण्डीभूतं तेजो वह्न्यादिकम्[3] सुवर्णं तु[4] उद्भूताभिभूतरूपस्पर्शं तत् अनुद्भूतरूपत्वे अचाक्षुषं स्यात् अनुद्भूतस्पर्शत्वे त्वचा न गृह्येते[5]। अभिभवस्तु बलवत् सजातीयेन पार्थिवरूपेण स्पर्शेन च कृतः। अनुद्भूतरूपस्पर्शं तेजो यथा[6]; चक्षुरिन्द्रियम्; अनुद्भूतरूपमुद्भूतस्पर्शम् वा यथा। तप्तवारिस्थं तेजः। उद्भूतरूपमनुद्भूतस्पर्शं यथा; प्रदीपप्रभामण्डलम् ॥

---

(१) शरीरेति नास्ति ३ पु. । (२) दिव्यं भौममौदर्यमाकरजं चेति अधिकं ३ पु. । (३) पिण्डितं तेजो विद्युदादिकम् २ पु. (४) ननु सुवर्णं तेजःपदार्थ इत्यत्र किंप्रमाणम् । उच्यते । सुवर्णं तैजसं असतिप्रति बन्धके अत्यन्तानलसंयोगेऽपि अनुच्छिद्यमानजन्यद्रवत्वात् यन्नैवं तन्नैवं यथा पृथिवी पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य च अत्यन्ताग्निसंयोगनाश्यत्वात् इत्येवमनुमानस्यैव प्रमाणत्वात् इति । (५) स्पर्शनेन गृह्यते २ पु. (६) अनुद्भूतरूपमनुद्भूतस्पर्शं यथा २ पु. ।

वायुत्वाभिसम्बन्धवान् वायुः । त्वगिन्द्रियं प्रमाणं । प्राणवातादिप्रभेदः । संख्यास्पर्शपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगवान्। सच स्पर्शानुमेयः[1] । तथाहि । योऽयं वायौ वाति अनुष्णाशीतस्पर्श उपलभ्यते स गुणत्वात् गुणिनमन्तरेण अनुपपद्यमानो गुणिनमनुमापयति । गुणी च वायुरेव। पृथिव्या अनुपलब्धेः वायुः पृथिवीव्यतिरेकेण अनुष्णाशीतस्पर्शवान् । स च द्विविधः नित्यानित्यभेदात् । नित्यः परमाणुरूपो वायुः । अनित्यः कार्यरूप एव ॥ एवं पृथिव्यादिभूतचतुष्टयं नित्यं कार्यं चोक्तम् ॥

तत्र पृथिव्यादीनां चतुर्णां कार्याणामुत्पत्तिविनाशक्रमः कथ्यते । द्वयोः परमाण्वोः क्रियया संयोगे सति द्व्यणुकमुत्पद्यते। तस्य परमाणुः समवायिकारणम् । तत्संयोगोऽसमवायिकारणम् । अदृष्टादि निमित्तकारणम् । ततो द्व्यणुकानां त्रयाणां क्रियया संयोगे सति त्र्यणुकमुत्पद्यते । तस्य द्व्यणुकानि समवायिकारणम्। शेषं पूर्ववत् । एवं त्र्यणुकैः[2] चतुरणुकम्, चतुर-

---

(१) प्रशस्तपादाचार्यकृतभाष्ये तु वायोः स्पर्शशब्दधृतिकम्पानुमेयत्वमुक्तम् कारिकावलीकृताप्येतद्द्योतनार्थमादिपदमुपात्तम् "ज्ञेयस्पर्शादिलिङ्गक" इति, केशवमिश्रैस्तु केवलं स्पर्शानुमेयत्वमुक्तमिति विवेचनीयम् ।

(२) चतुर्भिः इत्यधिकम् २ पु. ।

णुकैः परं स्थूलम्, स्थूलतरैः तैः स्थूलतमम्, एवं महती पृथिवी, महत्य आपः, महत् तेजः, महांश्च वायुरुत्पद्यते। कार्यगता रूपादयः स्वाश्रयसमवायिकारणगतेभ्यो रूपादिभ्यो जायन्ते। कारणगुणाहि कार्यगुणान् आरभंते इति न्यायात्। इत्थमुत्पन्नस्य रूपादिमतः कार्यद्रव्यस्य घटादेरवयवेषु कपालादिषु नोदनादभिघाताद्वा कर्म जायते। तेन कृतो यो विभागः तेन अवयव्यारम्भकस्य असमवायिकारणभूतस्य संयोगस्य नाशः क्रियते। ततः कार्यद्रव्यस्य घटादेरवयविनः नाशः। एतेन अवयव्यारम्भकासमवायिकारणनाशे द्रव्यनाशो दर्शितः। क्वचित् समवायिकारणनाशे द्रव्यनाशः। यथा पूर्वोक्तस्यैव पृथिव्यादेः संहारे संजिहीर्षोः महेश्वरस्य संजिहीर्षा। ततोऽणुषु क्रिया[1], तया विभागः, ततः तयोः संयोगनाशे द्व्यणुकेषु नष्टेषु आश्रयनाशात् त्र्यणुकादिनाशक्रमेण पृथिव्यादिनाशः। यथावा तन्तूनां नाशे पटनाशः। तद्गतानां रूपादीनां स्वाश्रयनाशेनैव नाशः। अन्यत्र तु सत्येवाश्रये विरोधिगुणप्रादुर्भावेन विनाशः। यथा पाकेन घटादौ रूपादिनाश इति ॥

(१) ततो द्व्यणुकारम्भकेषु परमाणुषु क्रिया २ पु.।

किं पुनः परमाणुसद्भावे प्रमाणम्? उच्यते। यदिदं जालसूर्यमरीचिस्थं सर्वतः सूक्ष्मतमं रजः उपलभ्यते तत् स्वल्पपरिमाणद्रव्यारब्धम् कार्यद्रव्यत्वात् घटवत्। तच्च द्रव्यं कार्यमेव महाद्रव्यारम्भकस्य कार्यत्वनियमात्। तदेवं द्व्यणुकाख्यं द्रव्यान्तरं सिद्धम्।[1] तदपि स्वल्पपरिमाणसमवायिकारणालब्धं कार्य्यद्रव्यत्वात् घटवत्। यस्तु द्व्यणुकारम्भकः स एव परमाणुः सच अनारब्ध एवेति। ननु कार्यद्रव्यारम्भकस्य कार्यद्रव्यत्वाव्यभिचारात् तस्य कथमनारब्धत्वम्। उच्यते। अनन्तकार्यपरम्परादोषप्रसङ्गात्। तथाचसति अनन्तद्रव्यारब्धत्वाविशेषेण मेरुसर्षपयोः तुल्यपरिमाणत्वप्रसङ्गः। तस्मादनारब्ध एव परमाणुः। द्व्यणुकं तु द्वाभ्यामेव परमाणुभ्यामारभ्यते एकस्य अनारम्भकत्वात् आदिकल्पनायां प्रमाणाभावात्। त्र्यणुकं तु त्रिभिरेव द्व्यणुकैरारभ्यते एकस्यानारम्भकत्वात्। द्वाभ्यामारम्भे कार्यगुणमहत्त्वानुपपत्तिप्रसङ्गात्।[2] कार्यादिमहत्त्वं कारणमहत्त्वाद्वा कारणबहुत्वाद्वा। तत्र प्रथमस्यासम्भवात् चरममेषितव्यम्। न चतुरादिकल्पनायां प्रमाणमस्ति त्रिभिरेव महत्त्वारम्भोपपत्तेरिति।

---

(१) द्व्यणुकारब्धं तु द्रव्यं २ पु.। (२) गुणेति ३ पु. नास्ति।

शब्दगुणमाकाशम् शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागवत्। एकं विभुर्नित्यं च। शब्दलिङ्गकं च। शब्दलिङ्गकत्वमस्य कथम्? परिशेषात् प्रसक्तप्रतिषेधे अन्यत्राप्रसङ्गात् परिशिष्यमाणे संप्रत्ययः परिशेषः। तथाहि। शब्दः तावत् विशेषगुणः सामान्यवत्त्वे सति अस्मदादिबाह्यैकेन्द्रियग्राह्यत्वात् रूपादिवत्। गुणश्च गुण्याश्रित एव। नचास्य पृथिव्यादिचतुष्टयमात्मा च गुणी भवितुमर्हति श्रोत्रग्राह्यत्वात् शब्दस्य। येहि पृथिव्यादीनां गुणाः न ते श्रोत्रेण गृह्यन्ते। यथा रूपादयः। शब्दस्तु श्रोत्रेण गृह्यते। नापि दिक्कालमनसां गुणः विशेषगुणत्वात्। अतएव एभ्योऽष्टभ्यः अतिरिक्तः शब्दगुणी एषितव्यः। सएव आकाश इति। सच एकः भेदे प्रमाणाभावात् एकत्वेन च उपपत्तेः। आकाशत्वं सामान्यम् आकाशे न विद्यते सामान्यस्य अनेकवृत्तित्वात्। विभु चाकाशं। परममहत्परिमाणमित्यर्थः। सर्वत्र कार्योपलब्धेः। तत एव विभुत्वात् नित्यमिति।

कालो दिग्विपरीतपरत्वापरत्वानुमेयः। संख्यापरिमाण-

---

(१) द्रष्टव्यः २ पु.। अनुमीयते इति ३ पु. (२) अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि इति वैशेषिकं सूत्रम्। बहुतरतपनपरिस्पन्दान्तरितजन्मनि स्थविरे युवानमवधिं कृत्वा परत्वमुत्पद्यते। तच्च परत्वमसमवायिकारणसापेक्षम्। न च रूपाद्यसमवायिकारणम्।

पृथक्त्वसंयोगविभागवान्। एको नित्यो विभुश्च। कथमस्य दिग्विपरीतपरत्वापरत्वानुमेयत्वम्। उच्यते। सन्निहिते वृद्धे सन्निधानादपरत्वादेः तद्विपरीतं परत्वं प्रतीयते। व्यवहिते यूनि व्यवधानात् परत्वादेः तद्विपरीतमपरत्वम्। तदिदं दिक्कृतविपरीतं परत्वमपरत्वं च कार्यम् तत्कारणस्य दिगादेरसम्भवात् कालमेव कारणमनुमापयति। सच एकोऽपि वर्तमानातीतभविष्यत्क्रियोपाधिवशात् वर्तमानादिव्यपदेशं लभते पुरुष इव। यथा पुरुषः पच्यादिक्रियोपाधिवशात् पाचकयाजकादिव्यपदेशं। लभते। नित्यत्वविभुत्वे च अस्य पूर्ववत्।

व्यभिचारात्। त्रयाणां गन्धादीनां वायौ परत्वानुत्पादकत्वात्। स्पर्शस्य च उष्णादिभेदेन भिन्नस्य प्रत्येकं व्यभिचारात्। नचावच्छिन्नपरिमाणं तथा। तस्य विजातीयानारम्भकत्वात्। तपनपरिस्पन्दानां च व्यधिकरणत्वात्। तदवच्छिन्नद्रव्यसंयोग एव असमवायिकारणं परिशिष्यते। तच्च द्रव्यं पिण्डमार्तण्डोभयसंयुक्तं विभु स्यात्। आकाशस्य तत्स्वाभाव्यकल्पने क्वचिदपि भेर्यभिघातात् सर्वभेरीषु शब्दोत्पत्तिप्रसङ्गः। आत्मनश्च द्रव्यान्तरद्रव्यान्तरावच्छेदाय स्वप्रत्यासत्त्यतिरिक्तसन्निकर्षापेक्षत्वात्। अन्यथा वाराणसीस्थेन महारजनारुणिम्ना पाटलिपुत्रेऽपि स्फटिकमणेरारुण्यप्रसङ्गात्। अतः कालस्यैव मार्तण्डसंयुक्तस्य पिण्डेन संयोगः। परत्वासमवायिकारणम्। काल एव-मार्तण्डक्रियोपनायकः। कालस्य तु तत् स्वभावतयैव कल्पनात् अयमदोषः। कालेनापि रागसंक्रमः कथं नेति चेत्। नियतक्रियोपनायकत्वेनैव तत्सिद्धेः इत्युपस्कारकृतः कालसिद्धौ युक्तिमाहुः। (१) तत्तद्विपरीतम् २ पु.

दिगेका नित्या विभ्वी च । संख्यापरिमाणपृथक्त्वसंयोगविभागगुणवती पूर्वपरादिप्रत्ययैरनुमेया । तेषामन्यनिमित्तासम्भवात् । पूर्वस्मिन् पश्चिमे वा देशे स्थितस्य वस्तुनः तादवस्थ्यात् । सा च एकापि सवितुः तत्तद्देशसंयोगोपाधिवशात् प्राच्यादिसंज्ञां लभते ॥

आत्मत्वाभिसम्बन्धवानात्मा । [1]सुखादिवैचित्र्यात् प्रतिशरीरं भिन्नः । स चोक्त एव । तस्य सामान्यगुणाः संख्यादयः । पञ्च बुद्ध्यादयो नव विशेषगुणाः । नित्यत्वविभुत्वे पूर्ववत् ॥

[2]मनस्त्वाभिसम्बन्धवन्मनः । अणुआत्मसंयोगि अन्तरिन्द्रियम् सुखाद्युपलब्धिकरणम् नित्यं च [3]संख्याद्यष्टगुणवत् तत्संयोगेन बाह्येन्द्रियमर्थग्राहकम् । अतएव सर्वोपलब्धिसाधनम् । तच्च न प्रत्यक्षम् अनुमानेन गम्यम् । तथाहि । सुखाद्युपलब्धयः चक्षुराद्यतिरिक्तकरणसाध्याः असत्स्वपि चक्षुरादिषु जायमानत्वात् । यद्वस्तु यद्विनैवोपपद्यते तत्तदतिरिक्तकरणसाध्यम् यथा कुठारं विना उत्पद्यमाना पचनक्रियातदतिरिक्तवह्न्यादिकरणसाध्या ।

---

(१) सुखदुःखादिवैचित्र्यान्नानाभूत एवेति ३ पु. । (२) मनस्त्वजातिमन्मनः २ पु. । (३) संख्यादिपंचगुणवत् परत्वापरत्ववेगवच्चेति ३ पु. ।

यच्च[1] करणं तन्मनः । तच्च चक्षुराद्यतिरिक्तम्[2] तच्चाणुपरिमाणम् । द्रव्याण्युक्तानि ॥

अथ गुणा उच्यन्ते । गुणत्वसामान्यवानसमवायिकारणमस्पन्दात्मा गुणः । सच द्रव्याश्रितएव। रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदात् चतुर्विंशतिधा । तत्र रूपं चक्षुर्मात्रग्राह्यं विशेषगुणः । पृथिव्यादित्रयवृत्ति । तच्च शुक्लाद्यनेकप्रकारकम्। पाकजं च पृथिव्याः। तच्चानित्यं पृथिवीमात्रे आप्यतैजसपरमाण्वोः नित्यम् । आप्यतैजसकार्येषु अनित्यम् । शुक्लभास्वरमपाकजं तेजसि । तदेव अभास्वरमप्सु[3] ॥

रसो रसनेन्द्रियग्राह्यो विशेषगुणः । पृथिवीजलवृत्तिः । तत्र पृथिव्या मधुरादिषट्प्रकाराः । मधुराम्ललवणकटुकषायतिक्तभेदात् पाकजश्च । अप्सु मधुरः अपाकजः नित्योऽनित्यश्च । नित्यः परमाणुभूतासु अप्सु । कार्य्यभूतासु अनित्यः ।

गन्धः घ्राणग्राह्यो विशेषगुणः। पृथिवीमात्रवृत्तिः ।अनित्यएव। स द्विविधः सुरभिः असुरभिश्च। जलादौ गन्धप्रतिभासस्तु संयुक्तसमवायेन ।

---

(१) घटवत् इत्यधिकम् २ पु. । (२) तच्च चक्षुराद्यतिरिक्तम् इति नास्ति २ पु. । (३) तदेवाभास्वरमपाकजमप्सु २ पु. ।

स्पर्शः त्वगिन्द्रियग्राह्यो विशेषगुणः। पृथिव्यादिचतुष्टयवृत्तिः। स च त्रिविधः। शीतोष्णानुष्णाशीतभेदात्। शीतः पयसि। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः। पृथिवीमात्रे ह्यनित्यः। आप्यतैजसवायवीयपरमाणुषु नित्यः। आप्यादिकार्येषु अनित्यः।

एते च रूपादयश्चत्वारः महत्त्वैकार्थसमवेतत्वे सति अणुभिन्नत्वे सति उद्भूता एव प्रत्यक्षाः।

संख्या एकत्वादिव्यवहारहेतुः सामान्यगुणः। एकत्वादि-परार्द्धपर्यन्ता। तत्र एकत्वं द्विविधम् नित्यानित्यभेदात्। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। स्वाश्रयसमवायिकारणगतैकत्वजन्यं च। द्वित्वं तु अनित्यमेव। तच्च द्वयोः पिण्डयोरिदमेकमिदमेकमित्यपेक्षाबुद्ध्या जन्यते। तत्र द्वौ पिण्डौ समवायिकारणे। पिण्डयोरेकत्वेऽसमवायिकारणे। अपेक्षाबुद्धिः निमित्तकारणम्। अपेक्षाबुद्धिनाशाद्द्वित्वनाशः एवं त्रित्वाद्युत्पत्तिर्विज्ञेया॥

परिमाणं मानव्यवहारासाधारणकारणम्। तच्चतुर्विधम्। अणु महत् दीर्घं ह्रस्वं चेति। तत्र कार्यगतं परिमाणं संख्यापरिमाणप्रचययोनि। तथाहि। द्व्यणुकपरिमाणमीश्वरापेक्षाबुद्धिजन्यं परमाणुद्वित्वजनितत्वात् संख्यायोनि। संख्याकारणकमित्यर्थः। त्र्य-

(१) अणुभिन्नत्वे सतीतिनास्ति २ पु.।

णुकपरिमाणं च स्वाश्रयसमवायिकारणगतबहुत्वसंख्यायोनि। चतुरणुकादिपरिमाणं तु स्वाश्रयसमवायिकारणपरिमाणजन्यम्। तूलपिण्डपरिमाणं तु स्वाश्रयसमवायिकारणावयवानां[1] प्रशिथिलसंयोगजन्यम् । परमाणुपरिमाणं परममहत्परिमाणं च आकाशादिगतं नित्यमेव ॥

पृथक्त्वं पृथग्व्यवहारासाधारणं कारणम् । तच्च द्विविधम् एकपृथक्त्वं द्विपृथक्त्वादिकं च। तत्राद्यं नित्यगतं नित्यम्। अनित्यगतमनित्यम् । द्विपृथक्त्वादिकं च अनित्यमेव ॥

संयोगः संयुक्तव्यवहारहेतुः गुणः।स द्व्याश्रयः अव्याप्यवृत्तिश्च। स त्रिविधः। अन्यतरकर्मजः उभयकर्मजः संयोगजश्चेति । तत्र प्रथमः यथा । क्रियावता श्येनेन सह निष्क्रियस्य स्थाणोः संयोगः। तस्य श्येनक्रिया असमवायिकारणम् । द्वितीयः यथा। सक्रिययोः मल्लयोः संयोगः । तृतीयो यथा। कारणाकारणसंयोगात् कार्याकार्यसंयोगः । यथा । हस्ततरुसंयोगात् कायतरुसंयोगः[2] ।

विभागोऽपि विभक्तप्रत्ययहेतुः। संयोगपूर्वो द्व्याश्रयः। स त्रिविधः अन्यतरकर्मज उभयकर्मजः विभागजश्चेति । तत्र प्र-

---

(१) कारणानाम् १ पु.। (२) अनिलश्च इत्यधिकम् २ पु.।

थमो यथा। श्येनक्रियया स्थाणुश्येनयोर्विभागः। द्वितीयो यथा। मल्लयोर्विभागः। तृतीयो यथा। हस्ततरुविभागात् कायतरुविभागः[1]॥

परत्वापरत्वे परापरव्यवहारासाधारणकारणे[2]। ते तु द्विविधे दिक्कृते कालकृते च। तत्र दिक्कृतयोरुत्पत्तिः कथ्यते। एकस्यां दिशि अवस्थितयोः पिण्डयोरिदमस्मात् सन्निकृष्टमिति बुद्ध्यानुगृहीतेन दिक्पिण्डसंयोगेन अपरत्वं सन्निकृष्टे जन्यते। विप्रकृष्टबुद्ध्या तु विप्रकृष्टे परत्वं जन्यते। सन्निकर्षस्तु पिण्डस्य द्रष्टुः शरीरापेक्षया संयुक्तसंयोगाल्पीयस्त्वम्। तद्बहुत्वं विप्रकर्षः इति।

कालकृतयोस्तु परत्वापरत्वयोरुत्पत्तिः कथ्यते। अनियतदिगवस्थितयोः युवस्थविरपिण्डयोरयमस्मादल्पतरकालेन सम्बद्ध इत्यपेक्षाबुद्ध्याऽनुगृहीतेन कालपिण्डसंयोगेन असमवायिकारणेन यूनि अपरत्वम्। अयमस्मात् बहुतरकालेन सम्बद्ध इति धिया स्थविरे परत्वम्॥

गुरुत्वमाद्यपतनासमवायिकारणम्। पृथिवीजलवृत्ति। यथोक्तम्। "संयोगवेगप्रयत्नाभावे सति गुरुत्वात् पतन"मिति॥

द्रवत्वमाद्यस्यन्दनासमवायिकारणम्। भूतेजोजलवृत्ति। भूते-

(१) अनित्यश्च इत्यधिकम् २ पु.। (२) व्यवहारासाधारणे २पु.।

जसोः घृतादिसुवर्णयोरग्निसंयोगेन द्रवत्वं नैमित्तिकम् । जले नैसर्गिकम् ॥

स्नेहः चिक्कणतागुणः । जलमात्रवृत्तिः । कारणगुणपूर्वकः[1] गुरुत्वादिवत् यावद्द्रव्यभावी ॥

शब्दः श्रोत्रग्राह्यः । आकाशस्य विशेषगुणः । ननु कथं तस्य श्रोत्रेण ग्रहणम्? यतो भेर्यादिदेशे शब्दा जायन्ते श्रोत्रं तु पुरुषदेशेऽस्ति । सत्यम् । भेरीदेशे जातः शब्दो वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा स्वसन्निहितं शब्दान्तरमारभते । स च शब्दः शब्दान्तर मिति क्रमेण श्रोत्रदेशे जातोऽन्त्यः शब्दः श्रोत्रेण गृह्यते नत्वाद्यः नापि मध्यमः । एवं वंशे पाट्यमाने दलद्वयविभागदेशे जातः शब्दः शब्दान्तरारम्भणक्रमेण श्रोत्रदेशेऽन्त्यं शब्दं जनयति । सोन्त्यः शब्दः श्रोत्रेण गृह्यते नाद्यः न मध्यमः । भेरीशब्दो मया श्रुत इति मतिस्तु भ्रान्तैव[2] । भेरीशब्दोत्पत्तौ भेर्याकाशसंयोगोऽसमवायिकारणम् । भेरीदण्डसंयोगः निमित्तकारणम् । एवं वंशपाटनात् चटपटाशब्दोत्पत्तौ वंशदलाकाशविभागोऽसमवायिकारणम्[3] । दलद्वयविभागो निमित्तकारणम् । इत्थमाद्यः शब्दः

(१) स च स्वाश्रयसमवायिकारणगुणपूर्वकः २ पु. । (२) भ्रान्तिरेव २ पु. । (३) दलद्वयाकाशविभागौ २ पु. ।

संयोगजो विभागजो वा अन्त्यमध्यमशब्दानां असमवायिकारणम्। अनुकूलवातो निमित्तकारणम्। यथोक्तं "संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्ति"रिति। आद्यादीनां सर्वशब्दानामाकाशमेकमेव समवायिकारणम्। कर्मबुद्धिवत्त्रिक्षणावस्थायित्वम्। तत्राद्यमध्यमशब्दाः कार्यशब्दनाश्याः। अन्त्यस्तु उपान्त्येन। उपान्त्यस्तु अन्त्येन सुन्दोपसुन्दन्यायेन नश्यति। इदं त्वयुक्तम्। उपान्त्येन त्रि[1]क्षणावस्थायिना अन्त्यस्य द्वितीयक्षणानुयायिना तृतीयक्षणे चासताऽन्त्यनाशजननासम्भवात्। तस्मादुपान्त्यनाशादेवान्त्यनाश इति। विनाशित्वञ्च शब्दस्यानुमानात्। तथाहि। शब्दोऽनित्यः सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वात् घटवदिति शब्दस्यानित्यत्वं साध्यं। अनित्यत्वं विनाशावच्छिन्नरूपत्वं नतु विनाशावच्छिन्नसत्तायोगित्वम् प्रागभावे सत्ताहीनेऽनित्यत्वाभावप्रसंगात्। सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वं हेतुः। इन्द्रियग्राह्यत्वादित्युच्यमाने आत्मनि व्यभिचारः स्यादत उक्तं बाह्येति। एवमपि योगिबाह्येन्द्रियग्राह्ये परमाण्वादौ व्यभिचारः स्यादतो योगिनिरासार्थमस्मदादीति। तथापि सामान्यादिना व्यभिचारोऽत उक्तं सामान्यवत्त्वे सतीति।

---

(१) तृतीयक्षणावस्थायिना इति पाठः ५ पु.।

सामान्यादित्रयं तु निःसामान्यं। किं पुनर्योगिसद्भावे प्रमाणम्। उच्यते । परमाणवः कस्यचित्प्रत्यक्षाः प्रमेयत्वात् घटवदिति ।

अर्थप्रकाशो बुद्धिः ॥ प्रीतिः सुखम् ॥ तच्च सर्वात्मनामनुकूलवेदनीयम् ॥ पीडा दुःखम् ॥ तच्च सर्वात्मनां प्रतिकूलवेदनीयम् ॥ राग इच्छा ॥ क्रोधो द्वेषः ॥ उत्साहः प्रयत्नः ॥ बुद्ध्यादयः षड्मानसप्रत्यक्षाः ।

सुखदुःखयोरसाधारणकारणे धर्म्माधर्म्मौ । तौ चाप्रत्यक्षावप्यनुमानगम्यौ । तथाहि । देवदत्तस्य शरीरादिकं देवदत्तविशेषगुणजन्यं कार्य्यत्वे सति देवदत्तभोगहेतुत्वात् देवदत्तनिर्मितस्रग्वत् । यश्च शरीरादिजनक आत्मविशेषगुणः सएव धर्म्मोऽधर्मश्च । प्रयत्नादीनां शरीराद्यजनकत्वात् ।

संस्कारस्त्रिविधः वेगो भावना स्थितस्थापकश्च ॥ तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः ॥ सच क्रियाहेतुः ॥ भावनाख्यस्तु आत्मवृत्तिः अनुभवजन्यः स्मृतिहेतुः ॥ सचोद्बुद्ध एव स्मृतिं जनयति । उद्बोधश्च सहकारिलाभः । सहकारिणश्च संस्कारस्य सदृशदर्शनादयः । यथोक्तम्। सादृश्यादृष्टचिन्ताद्याः स्मृतिबीजस्य हेतव इति ॥ स्थितिस्थापकश्च स्पर्शवद्विशेषद्रव्यवृत्तिः ॥ अ-

(१) यस्य प्रत्यक्षाः स एवयोगी इत्यधिकं २ पु. । (२) आगमगम्यौ च २ पु. । (३) देवदत्तप्रयत्नजन्यवस्तुवत् २ पु. ।

न्यथा भूतस्य स्वाश्रयस्य धनुरादेः पुनस्तादवस्थ्यापादकः[1] ॥ एते च बुद्ध्यादयोऽधर्म्मान्ता भावना चात्मविशेषगुणाः ॥ गुणा उक्ताः ॥ ॥

कर्म्माण्युच्यन्ते । चलनात्मकं कर्म्म । गुणइव द्रव्यमात्रवृत्ति अविभु द्रव्यपरिमाणेन (क) मूर्त्तत्वापरनाम्ना सहैकार्थसमवेतं विभागद्वारा पूर्वसंयोगनाशे सत्युत्तरसंयोगहेतुश्च । तच्च उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनभेदात् पञ्चविधम् । भ्रमणादयस्तु गमनग्रहणेनैव गृह्यन्ते ।

अनुवृत्तिप्रत्ययहेतुः सामान्यम् ॥ द्रव्यादित्रयवृत्ति नित्यमेकमनेकानुगतं च । तच्च द्विविधं परमपरञ्च । परं सत्ता बहुविषयत्वात् । सा चा नुवृत्तिमात्रहेतुत्वात्सामान्यम् । अपरं द्रव्यत्वादि अल्पविषयत्वात् । तच्च व्यावृत्तेरपि हेतुत्वात्सामान्यविशेषः । अत्र कश्चिदाह । व्यक्तिव्यतिरिक्तं सामान्यं[2]नास्तीति ॥ अत्र ब्रूमः । किमालम्बना तर्हि भिन्नेषु विलक्षणेषु पि-

---

(१) संस्कारः स्थितिस्थापक इत्यधिकम् २ पु. । (क) अविभुद्रव्यपरिमाणेन । अवच्छिन्नपरिमाणेन । तदेव मूर्त्तत्वं । अवच्छिन्नपरिमाणवत्त्वस्य मूर्त्तत्वलक्षणत्वात् । नतु मूर्त्तत्वं जातिः । तथासति विनिगमनाविरहेण भूतत्वस्यापि जातित्वापत्तेः । इष्टापत्तौ च तयोः परस्परं साङ्कर्य्येण न उभयोर्जातित्वमिति । तदुक्तम् । व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसंग्रहः इति । (२) सामान्यम् इत्यधिकम् २ पु. ।

ण्डेषु एकाकारा बुद्धिः विनासर्वानुगतमेकम् किञ्चित्तदालम्बनं तदेव च सामान्यम् । ननु तस्य अतद्व्यावृत्तिकृतैव एकाकारा बुद्धिरस्तु । तथाहि । सर्वेष्वेव गोपिण्डेषु अगोभ्योऽश्वादिभ्यो व्यावृत्तिरस्ति । तेनागोव्यावृत्तिविषय एवायमेकाकारः प्रत्ययः अनेकेषु गोपिण्डेषु नतु[1] विधिरूपोगोत्वसामान्यविषय इति । मैवम् । विधिमुखेनैव एकाकारस्फुरणात् ।

विशेषो नित्यः। नित्यद्रव्यवृत्तिः । व्यावृत्तिबुद्धिमात्रहेतुः । नित्यद्रव्याणि च आकाशादीनि पञ्च पृथिव्यादयश्चत्वारः परमाणुरूपाः ।

अयुतसिद्धयोः सम्बन्धः समवायः। सचोक्त एव । ननु अवयवावयाविनौ अयुतसिद्धौ । तेन तयोः सम्बन्धः समवायः । नचैतद्युक्तम् अवयवातिरिक्तस्य अवयविनोऽभावात्। परमाणव एव बहवस्तथा भूताः सन्निकृष्टा घटोऽयं घटोऽयमिति गृह्यन्ते । अत्रोच्यते। अस्त्येकः स्थूलो घट इति प्रत्यक्षा बुद्धिः । नच सा परमाणुषु अनेकेषु अस्थूलेषु अतीन्द्रियेषु भवितुमर्हति । भ्रान्तेयं बुद्धिरितिचेत् । न । बाधकाभावात् ॥

तदेवं षट्पदार्था द्रव्यादयो वर्णिताः । तेच[2] विधिमुखप्रत्ययवेद्यत्वात् भावरूपा एव ॥ ॥

---

(१) न तु विधिरूपगोत्वसामान्यविशेषः इति ४ पु। (२) येच २ पु. ।

इदानीं निषेधमुखप्रमाणगम्योऽभावरूपः सप्तमः पदार्थः प्रतिपाद्यते। स एवाभावः संक्षेपतो द्विविधः संसर्गाभावोऽन्योन्याभावश्चेति। संसर्गाभावोऽपि त्रिविधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्चेति।

उत्पत्तेः प्राक् कारणे कार्य्यस्याभावः प्रागभावः। यथा। तन्तुषु पटाभावः। सचानादिरुत्पत्तेरभावात्। विनाशी च कार्य्यस्यैव तद्विनाशरूपत्वात्।

उत्पन्नस्य कारणेऽभावः प्रध्वंसाभावः। विनाश इति यावत्। यथा। भग्ने घटे कपालमालायां घटाभावः। स च मुद्गरप्रहारादिजन्यः। सचोत्पत्तिमानप्यविनाशी नष्टस्य कार्यस्य पुनरनुत्पत्तेः।

त्रैकालिकोऽभावः अत्यन्ताभावः। यथा। वायौ रूपाभावः।

अन्योन्याभावस्तु तादात्म्यप्रतियोगिताकोऽभावः। घटः पटो न भवतीति॥ तदेवमर्था व्याख्याताः॥ ॥

ननु ज्ञानात्ब्रह्मणो वा अर्था व्यतिरिक्ता न सन्ति। मैवम्। अर्थानामपि प्रत्यक्षसिद्धत्वेन अशक्यापलापत्वात्॥

बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्य्यायशब्दैर्यदभिधीयते सा बुद्धिः॥ अर्थप्रकाशो वा बुद्धिः॥ साच संक्षेपतो द्वि-

विधा अनुभवः स्मरणं च । अनुभवोऽपि द्विविधः यथार्थोऽयथार्थश्चेति ।

तत्र यथार्थोऽविसंवादी । सच प्रत्यक्षादिप्रमाणैर्जन्यते । यथा । चक्षुरादिभिरदुष्टैर्घटादिज्ञानम् धूमलिङ्गकमग्निज्ञानम् गोसादृश्यदर्शनात् गवयशब्दवाच्यताज्ञानम् ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिवाक्यात् ज्योतिष्टोमस्य स्वर्गसाधनताज्ञानं च ।

अयथार्थस्तु अर्थव्यभिचारी अप्रमाणजः । स त्रिविधः संशयस्तर्को विपर्य्यय इति च । संशयतर्कौ वक्ष्येते ।

विपर्य्ययस्तु अतस्मिंस्तद्ग्रहः । भ्रम इतियावत् । यथा पुरोवर्तिन्यरजते शुक्त्यादौ रजतत्वग्रहः इदं रजतमिति ।

स्मरणमपि यथार्थमयथार्थं चेति द्विविधम् । तदुभयं जागरे। स्वप्ने तु सर्व्वमेव ज्ञानं स्मरणमेवमयथार्थं च । दोषवशेन तदिति स्थाने इदमित्युदयात् । सर्व्वं ज्ञानं निराकारमेव । नतु ज्ञाने अर्थेन स्वस्याकारो जन्यते । साकारज्ञानवादिनिराकरणात् । अतएवाकारेण अर्थानुमानमपि निरस्तम् । प्रत्यक्षसिद्धत्वात् । घटादेः सर्वज्ञानमर्थानिरूप्यम् अर्थप्रतिबद्धस्यैव तस्य मनसा निरूपणात् घटज्ञानवानहमिति नतु ज्ञानवानहमित्येतावन्मात्रं जायते ।

(१) घटज्ञानवानहमिति तावन्मात्रमेव ज्ञायते २ पु. ।

अन्तरिन्द्रियं मनः । तच्चोक्तमेव । प्रवृत्तिर्धर्म्माधर्म्ममयी यागादिक्रिया तयोर्जगद्व्यवहारसाधकत्वात् ॥

दोषा रागद्वेषमोहाः ॥ रागः इच्छा ॥ द्वेषो मन्युः ॥ क्रोध इति यावत् ॥ मोहः मिथ्याज्ञानम् ॥ विपर्य्यय इति यावत् ॥

पुनरुत्पत्तिः प्रेत्यभावः ॥ स च आत्मनः पूर्वदेहनिवृत्तिरपूर्वदेहसंघातलाभः ॥ फलं पुनर्भोगः [1]सुखदुःखान्यतरसाक्षात्कारः ॥ पीडा दुःखम् ॥ तच्चोक्तमेव ।

मोक्षोऽपवर्गः । स च एकविंशतिप्रभेदभिन्नस्य दुःखस्यात्यन्तिकी निवृत्तिः । एकविंशतिभेदास्तु शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति । गौणमुख्यभेदात् । सुखं दुःखमेव दुःखानुषङ्गिकत्वात् । अनुषङ्गोऽविनाभावः । सचायमुपचारः मधुनि विषसंयुक्ते मधुनोपि विषपक्षनिक्षेपवत् ।

स पुनरपवर्गः कथम् । उच्यते । शास्त्राद्विदितसमस्तपदार्थतत्वस्य विषयदोषदर्शनेन विरक्तस्य मुमुक्षोः ध्यायिनः ध्यानपरिपाकवशात् साक्षात्कृतात्मनः क्लेशहीनस्य निष्कामकर्म्मानुष्ठानात् अनागतधर्म्माधर्म्मौ अनर्जयतः पूर्व्वोपात्तं धर्म्माधर्म्मप्रचयं योगर्धिप्रभावात् विदित्वा समाहृत्य भुञ्जानस्य पूर्व्वकर्म्मनिवृत्तौ वर्तमानशरीराद्यपगमे अपूर्व्वशरीराभावात् शरीराद्ये-

(१) भोगः सुखदुःखानुभवः २ पु. ।

कविंशतिदुःखसम्बन्धो न भवति कारणाभावात्। सोऽयमेक-विंशतिप्रभेददुःखहानिर्मोक्षः। अयमेवापवर्ग इति उच्यते।

इदानीं संशयमाह। एकस्मिन् धर्मिणि विरुद्धनानार्थाव-मर्शः संशयः॥ स च त्रिविधः विशेषादर्शने सति समानधर्मदर्श-नजः विप्रतिपत्तिजः असाधारणधर्मजश्चेति। तत्रैको विशेषाद-र्शने सति समानधर्मदर्शनजो यथा। स्थाणुर्वा पुरुषो वेति। ए-कस्मिन्नेव हि पुरोवर्त्तिनि द्रव्ये स्थाणुत्वनिश्चायकं वक्रकोटरा-दिकं पुरुषत्वनिश्चायकं च शिरःपाण्यादिकं विशेषमपश्यतः स्थाणुपुरुषयोः समानधर्ममूर्द्धत्वादिकंच पश्यतः पुरुषस्य सं-शयो भवति किमयं स्थाणुर्वा पुरुषो वेति॥ द्वितीयस्तु विशेषादर्शने सति विप्रतिपत्तिजः। स यथा। शब्दो नित्यः उत अनित्य इति। तथाहि। एको ब्रूते शब्दो नित्य इति। अपरो ब्रूते शब्दोऽनित्य इति। तयोर्विप्रतिपत्त्या मध्यस्थस्य पुंसो विशेष-मपश्यतो भवति संशयः किमयं शब्दो नित्य उत अनित्य इति। असाधारणधर्मजस्तु यथा। नित्यादनित्याच्च व्यावृत्तेन भू-मात्रासाधारणेन गन्धवत्त्वेन विशेषमपश्यतो भुवि नित्यत्वा-नित्यत्वसंशयः। तथाहि। सकलनित्यव्यावृत्तेन गन्धवत्त्वेन यो-

---

(१) पुरुषत्वादिलक्षणं २ पु.। (२) स्थाणुपुरुषयोस्समानमूर्ध-त्वादिकं च पश्यत इति अधिकम् २ पु.।

गात् भूः किमनित्या उत सकलानित्यव्यावृत्तेन तेनैव योगात् नित्येति संशयः ।

येन पुरुषः प्रवर्तते तत् प्रयोजनम् । तच्च सुखदुःखावाप्तिहानी । तदर्था हि प्रवृत्तिः सर्वस्य ॥

वादिप्रतिवादिनोः संप्रतिपन्नो विषयो दृष्टान्तः । स च द्विविधः। एकः साधर्म्यदृष्टान्तः । यथा।धूमवत्त्वस्य हेतोर्महानसम् । द्वितीयस्तु वैधर्म्यदृष्टान्तः । यथा । तस्यैव हेतोर्महाह्रद इति ।

प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः । स चतुर्धा सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तभेदात्। तत्र सर्वतन्त्रसिद्धान्तो यथा। धर्मिमात्रसद्भावः । द्वितीयो यथा। नैयायिकस्य मते मन इन्द्रियं । तद्धि समानतन्त्रे वैशेषिके सिद्धम् । तृतीयो यथा क्षित्यादिकर्तृसिद्धौ कर्तुः सर्वज्ञत्वम्। चतुर्थो यथा। जैमिनीयस्य नित्यानित्यविचारो यावद् भवतु तावत् शब्दो गुण इति ।

अनुमानवाक्यस्यैकदेशा अवयवाः। ते च प्रतिज्ञादयः पञ्च । तथाच न्यायसूत्रम् "प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः" इति । तत्र साध्यधर्मविशिष्टप्रतिपादकं वचनं प्रतिज्ञा ॥ यथा । पर्वतोऽयं वह्निमानिति ।

(१) प्रमाणात्प्रमेयज्ञानम् ४ पु. ।

तृतीयान्तं पञ्चम्यन्तं वा लिङ्गप्रतिपादकं वचनं हेतुः। यथा धूमवत्त्वेन धूमवत्त्वादिति वा ।

सव्याप्तिकं दृष्टान्तवचनमुदाहरणम्। यथा। यो यो धूमवान् सोऽग्निमान् यथा महानसइति ।

पक्षे लिङ्गोपसंहार उपनयः। यथा। वह्निव्याप्यधूमवांश्चायमिति । तथा चायमिति वा ।

पक्षे साध्योपसंहारो[1] निगमनम्। यथा। तस्मादग्निमान् तस्मात् तथेति वा । एते च प्रतिज्ञादयः पञ्च अनुमानवाक्यस्य अवयवा इव अवयवाः नतु समवायिकारणम् शब्दस्याकाशसमवेतत्वात् ।

तर्कोऽनिष्टप्रसञ्जनम् । स च सिद्धव्याप्तिकयोर्धर्मयोः व्याप्याङ्गीकारेण अनिष्टव्यापकप्रसञ्जनम् यद्यत्र घटोऽभविष्यत् तर्हि अद्रक्ष्यदिति। सचायं तर्कः प्रमाणानामनुग्राहकः। तथाहि। पर्वतोऽयमग्निमानुतानग्निरिति सन्देहानन्तरं यदि कश्चित् मन्येत अनग्निरिति तदा तं प्रति यदि अयमनग्निरभविष्यत् अनग्नित्वादधूमोऽप्यभविष्यदित्यधूमवत्त्वप्रसञ्जनं क्रियते । स एष प्रसङ्गस्तर्क इत्युच्यते। अयं[2] च अनुमानस्य शोधकः प्रवर्त्तमानस्य धूमवत्त्वलिङ्गकानुमानस्य विषयमग्निमनुजानाति अनग्निमत्त्वप्र-

(१) साध्योपसंहारवचनं २ पु. । (२) एवम् २ पु. ।

तिक्षेपात्। अतोऽनुमानस्य भवत्यनुग्राहक इति। अत्र कश्चिदाह। तर्कः संशये अन्तर्भवति इति। तन्न। एककोटिविषयत्वात् तर्कस्य।

निर्णयोऽवधारणज्ञानम्। तच्च प्रमाणफलम्।

तत्त्वबुभुत्सोः कथा वादः। स चाष्टनिग्रहाणामधिकरणम्। ते च न्यूनाधिकापसिद्धान्ता हेत्वाभासपञ्चकं चेत्यष्टौ निग्रहाः।

उभयसाधनवती विजिगीषुकथा जल्पः। स च यथासम्भवं सर्वनिग्रहाणामधिकरणम्। परपक्षे दूषिते स्वपक्षस्थापनप्रयोगावसानञ्च।

सएव स्वपक्षस्थापनाहीनो वितण्डा। साच परपक्षदूषणमात्रपर्यवसाना। नास्य वैतण्डिकस्य स्थाप्यः पक्षोऽस्ति॥ कथा तु नानावक्तृकपूर्व्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः।

उक्तानां पक्षधर्म्मत्वादिरूपाणां मध्ये येन(१) केनापि रूपेण हीना अहेतवः॥ तेऽपि कतिपयहेतुरूपयोगात् हेतुवदाभासमाना हेत्वाभासाः॥ ते चासिद्धविरुद्धानैकान्तिकप्रकरणसमकालात्ययापदिष्टभेदात् पञ्चैव॥ अत्र उदयनेन व्याप्तस्य हेतोः पक्षधर्म्मतया प्रतीतिः सिद्धिः तदभावोऽसिद्धिरित्यसिद्धिलक्षणमुक्तम्। तच्च यद्यपि विरुद्धादिष्वपि सम्भवतीति साङ्कर्य्यं प्रतीयते। तथापि यथा न साङ्कर्य्यं तथोच्यते। यो यत्र साधने पुरः परिस्फुरति

(१) एकेनापि २ पु.।

समर्थकश्च दुष्टज्ञप्तौ[1] स एव दुष्टज्ञप्तिकारकः। दूषणमिति यावत् नान्य इति। तेनैव पुरःस्फूर्तिकेन दुष्टज्ञप्तौ ज्ञापितायां कथापर्य्यवसाने जाते तदुपजीविनो[2]ऽन्यस्यानुपयोगात्। तथाच सति यत्र विरुद्धो साध्यविपर्य्ययव्याप्याख्यः दुष्टज्ञप्तिकारकः स एव विरुद्धो हेत्वाभासः। एवं यत्र ते व्यभिचारादयस्तथाभूताः। ये अनैकान्तिकादयः ते न पुनः व्याप्तिविशिष्ट[3]स्वरूपज्ञप्त्यभावेन पूर्वोक्ता असिद्धाः असिध्यादयः दुष्टज्ञप्तिकारकाः। यथाविच्छेदका इति यावत्।

तथाभूतः[4] सोऽसिद्धस्त्रिविधः आश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धभेदात्॥ तत्र यस्य हेतोराश्रयो नावगम्यते स आश्रयासिद्धः। यथा। गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र हि गगनारविन्दमाश्रयः। स च नास्त्येव। अयमप्याश्रयासिद्धः। तथाहि। घटः अनित्यः कार्य्यत्वात् पटवत्। ननु आश्रयस्य घटादेः सत्त्वात् कार्य्यत्वादिति हेतुर्नाश्रयासिद्धः सिद्धसाधकस्तु स्यात् सिद्धस्य घटानित्यत्वस्य साधनात्। मैवम्। नहि स्वरूपेण कश्चिदाश्रयो

(१) दुष्टिज्ञप्तौ १ पु. एवमग्रे सर्वत्र। (२) तदुपजीविनः इति नास्ति तदुपयोगिन इति ४ पु.। (३) व्याप्तिपक्षधर्म्मताविशिष्टहेतु २ पु.। (४) यथाभूतः २ पु.।

भवत्यनुमानस्य किन्तु सन्दिग्धधर्मवत्त्वेन। [1]तथाचोक्तं भाष्ये "नानुपलब्धेन निर्णीते थेंअपि तु सन्दिग्धेऽर्थे न्यायः प्रवर्तते"। नच घटे अनित्यत्वसन्देहोऽस्ति अनित्यत्वस्य निश्चितत्वात्। तेन यद्यपि स्वरूपेण घटो विद्यते। तथापि अनित्यत्वसन्देहाभावात् नासौ आश्रयः इत्याश्रयासिद्धत्वादहेतुः॥ स्वरूपासिद्धः स उच्यते यो हेतुराश्रये नैवावगम्यते। यथा। सामान्यमनित्यं कृतकत्वादिति कृतकत्वहेतुराश्रये सामान्ये नास्त्येव॥ [भागासिद्धो यथा। शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादिति। अत्र शब्दस्य अनित्यत्वं साध्यम्। प्रयत्नानन्तरीयकत्वादिति हेतुः। स च न सर्व्वेषां शब्दानां। आद्यशब्दस्य प्रयत्नानन्तरीयकत्वं पुरुषव्यापारेऽस्ति शब्दजनितशब्दे नास्तीति भागासिद्धो हेतुः। अथ किमिदं प्रयत्नानन्तरीयकत्वं। उच्यते। आदौ आत्ममनःसंयोगः ततो ज्ञानं ततो विवक्षा ततः प्रयत्नः ततः कोष्ठगतस्य वायोः पूर्व्वदेशविभागः ततः घटादिदेशसंयोगः तत आद्यनिष्पत्तिरिति। अस्यैव प्रयत्नानन्तरीयकत्वमस्ति अन्येषामाद्यशब्दजनितशब्दानां नास्तीति भागासिद्धो हेतुः। आद्ये शब्दे आत्ममनःसंयोगजनितज्ञानादिक्रमेण प्रयत्नानन्तरीयकत्वं पुरुषव्यापारे वर्तते न तु द्वितीयादिशब्देषु इति हेतोः पक्षैकदेशाव-

---

(१) तथाचोक्तभाष्ये इति नास्ति ३ पु.।

तित्वात्[1]] भागासिद्धोऽपि स्वरूपासिद्ध एव । यथा । पृथिव्यादयः चत्वारः परमाणवो नित्या गन्धवत्त्वादिति । गन्धवत्त्वं पक्षीकृतेषु नास्ति पृथिवीमात्रवृत्तित्वात् । अत एव भागे स्वरूपासिद्धम् ॥

तथा विशेषणासिद्धविशेष्यासिद्धासमर्थ[2]विशेषणासिद्धासमर्थविशेष्यासिद्धादयः स्वरूपासिद्धभेदाः ॥ तत्र विशेषणासिद्धो यथा । शब्दो नित्यः द्रव्यत्वे सति अस्पर्शवत्त्वात् । अत्र द्रव्यत्वविशिष्टमस्पर्शवत्त्वं हेतुः । नास्पर्शवत्त्वमात्रम् । शब्दे च द्रव्यत्वं नास्ति गुणत्वात् । अतः विशेषणा[3]सिद्धः । न चासति विशेषणे द्रव्यत्वे तद्विशिष्टमस्पर्शवत्त्वमस्ति विशेषणाभावे विशिष्टस्याभावात् । यथा दण्डाभावे दण्डविशिष्टस्य पुरुषस्याभावः । तेन सत्यपि अस्पर्शवत्त्वे विशिष्टस्य हेतोरसत्त्वात् स्वरूपासिद्धत्वम् ॥ विशेष्यासिद्धो यथा । शब्दो नित्यः अस्पर्शवत्त्वे सति द्रव्यत्वादिति । अत्रापि विशिष्टो हेतुः । नच विशेष्याभावे विशिष्टं स्वरूपमस्ति ॥ असमर्थविशेषणासिद्धो यथा । शब्दो नित्यः गुणत्वे सति अकारणत्वात् । अत्र विशेषणस्य न किञ्चित् सामर्थ्यमस्ति । अतो-

(१) [ ] एतन्मध्यस्थपाठो नास्ति द्वितीयपुस्तके । (२) विशेष्यासिद्धादयः २ पु. । (३) विशेषणासिद्धिः । २ पु. ।

ऽसमर्थविशेषणता। स्वरूपासिद्धस्तु विशेषणाभावे विशिष्टस्याभावात्। ननु विशेषणं गुणत्वं तच्च शब्देऽस्त्येव। तत् कथं विशेषणाभावः। सत्यम्। अस्त्येव गुणत्वं। किन्तु न तद्विशेषणम्। तदेव हि हेतोर्विशेषणं भवति यदन्यव्यवच्छेदेन प्रयोजनवत्। गुणत्वं च निष्प्रयोजकमतोऽसमर्थमित्युक्तमेव॥ असमर्थविशेष्यो यथा। तत्रैव तद्वैपरीत्येन प्रयोगे शब्दो नित्यः अकारणत्वे सति गुणत्वादिति। अत्र तु विशेषणमात्रस्यैव नित्यत्वसाधने समर्थत्वात् विशेष्यमसमर्थम्। स्वरूपासिद्धस्तु विशेष्याभावेऽपि विशिष्टाभावात् विशिष्टस्य हेतुत्वेनोपादानात्। शेषं पूर्ववत्॥

व्याप्यत्वासिद्धस्तु स एव यत्र हेतोर्व्याप्तिर्नावगम्यते। स द्विविधः। एकः साध्येनासहचरितः। अपरस्तु सोपाधिकसाध्यसम्बन्धी॥ तत्र प्रथमो यथा। यत् सत् तत् क्षणिकं यथा जलधरः। संश्च विवादास्पदीभूतः शब्दादिरिति। अत्रहि शब्दादिः पक्षः। तस्य क्षणिकत्वं साध्यं। सत्त्वं हेतुः। नचास्य हेतोः क्षणिकत्वेन व्याप्तौ प्रमाणमस्ति। इदानीमुपाधिसहितो व्याप्यत्वासिद्धः प्रदर्श्यते। यथा। स श्यामो मैत्रीतनयत्वात् परिदृश्य-

---

(१) व्यभिचारव्यवच्छेदेनेत्यर्थः। वस्तुतो समर्थविशेषणविशेष्यासिद्धयोर्व्याप्यत्वासिद्धेन्तर्भाव इति बोध्यम्।

मानमैत्रीतनयस्तोमवत्। अत्र मैत्रीतनयत्वेन श्यामत्वं साध्यं। न च मैत्रीतनयत्वं श्यामत्वे प्रयोजकं किन्तु शाकाद्यन्नपरिणाम एव प्रयोजकः। प्रयोजकश्चोपाधिरुच्यते। अतो मैत्रीतनयत्वेन[1] श्यामत्वेन सम्बन्धे शाकाद्यन्नपरिणामं[2] उपाधिः। यथा वा अग्नेर्धूमसम्बन्धे आर्द्रेन्धनसंयोगः। अतएवोपाधिसम्बन्धात् व्याप्तिर्नास्तीति व्याप्यत्वासिद्धोऽयं मैत्रीतनयत्वादिर्हेतुः॥ तथा परोपि व्याप्यत्वासिद्धः। यथा। क्रत्वन्तर्वर्त्तिनी हिंसा अधर्म्मसाधनं हिंसात्वात् क्रतुवाह्यहिंसावत्। नच हिंसात्वमधर्म्मे प्रयोजकं। किन्तु निषिद्धत्वमुपाधिरितिपूर्ववदुपाधिसद्भावात् व्याप्यत्वासिद्धोऽयं हिंसात्वं हेतुः। ननु साध्यव्यापकत्वे सति साधनाव्यापको यः स उपाधिरित्युपाधिलक्षणम्। तच्च निषिद्धत्वे नास्ति। तत् कथं निषिद्धत्वमुपाधिरिति। मैवम्। निषिद्धत्वेऽपि उपाधिलक्षणस्य विद्यमानत्वात्। तथाहि। साध्यस्य अधर्म्मस्य व्यापकं निषिद्धत्वम्। यत्र यत्र अधर्म्मसाधनत्वं तत्र तत्र अवश्यं निषिद्धत्वं इति निषिद्धत्वस्यविद्यमानत्वात्। नच यत्र यत्र हिंसात्वं तत्र तत्रावश्यं निषिद्धत्वं क्रत्वङ्गहिंसायां

---

(१) मैत्रीनयत्वस्य श्यामत्वेनसंबंधे इति २ पु.। (२) एव इत्यधिकम् २ पु.।

व्यभिचारात्। क्रत्वङ्गहिंसायां हिंसात्वमस्ति नतु निषिद्धत्वं इति। तदेवं त्रिविधोऽसिद्धो दर्शितः ॥

सम्प्रतिविरुद्धः कथ्यते। साध्यविपर्य्ययव्याप्तो हेतुः विरुद्धः। यथा। शब्दः नित्यः कृतकत्वादिति। अत्र हि नित्यत्वं साध्यम्। कृतकत्वं हेतुः। तद्विपर्य्ययेण अनित्यत्वेन कृतकत्वं व्याप्तमिति अतः साध्यविरुद्धव्याप्तत्वात् कृतकत्वं हेतुर्विरुद्धः।

साध्यसंशयहेतुरनैकान्तिकः सव्यभिचार इति चोच्यते। स द्विविधः साधारणानैकान्तिकः असाधारणानैकान्तिकश्चेति। तत्र प्रथमः यः पक्षसपक्षविपक्षवृत्तिः। यथा। शब्दो नित्यः प्रमेयत्वादिति। अत्र प्रमेयत्वं हेतुः पक्षे शब्दे सपक्षे नित्ये व्योमादौ विपक्षे चानित्ये घटादौ वर्त्तते सर्वस्य प्रमेयत्वात्। तस्मात् प्रमेयत्वं हेतुः साधारणानैकान्तिकः॥ असाधारणानैकान्तिकस्तु स एव यः सपक्षविपक्षव्यावृत्तः पक्ष एव वर्त्तते। यथा। भूर्नित्या गन्धवत्वादिति। अत्र हि गन्धवत्वं हेतुः। स च सपक्षान्नित्याद्व्योमादेर्विपक्षाच्चानित्याज्जलादेर्व्यावृत्तः गन्धवत्वस्य पृथिवीमात्रवृत्तित्वादिति। सव्यभिचारस्तु लक्ष्यते नियमासम्भवात्सपक्षविपक्षस्य हेतोः। सपक्षवृत्तित्वे सति विपक्षाद्व्यावृत्ति-

(१) तस्मात् हिंसात्वादिति हेतुरुपाधिसद्भावात्व्याप्यत्वासिद्धः। इत्यधिकम् २ पु.। (२) यत् कृतकं तत्नित्यमेव खल्वित्यधिकम्२.। पु

रेव नियमः गमकत्वात् । तस्य च साध्यविपरीतव्याप्तस्य च नियमाभावो व्यभिचारः। सच द्वेधा संभवति सपक्षविपक्षयोर्वृत्तौ ताभ्यां व्यावृत्तौ च ।

यस्य प्रतिपक्षभूतं हेत्वन्तरं विद्यते स प्रकरणसमः । स सत्प्रतिपक्ष इति चोच्यते ॥ यथा शब्दो अनित्यो नित्यधर्मानुपलब्धेः । शब्दो नित्यः अनित्यधर्मानुपलब्धेरिति । अत्र हि साध्यविपरीतसाधकं समानबलमनुमानान्तरं प्रतिपक्ष इत्युच्यते। यत्पुनरतुल्यबलं न तत्प्रतिपक्षः। तथाहि । विपरीतसाधकानुमानं त्रिविधम् उपजीव्यमुपजीवकमनुभयं चेति ॥ तत्राद्यं बाधकं बलवत् । यथा अनित्यः परमाणुः मूर्त्तत्वाद्घटवदित्यत्र धर्मिग्राहकं प्रमाणमाद्यं बलवत्। तच्च पक्षसाधकतयोपजीव्यं। नहि प्रमाणेनागृह्यमाणे धर्मिणि परमाणौ अनित्यत्वानुमानं इदं सम्भवति आश्रयासिद्धेः । अतोनेनानुमानेन परमाणुग्राहकस्य प्रामाण्यमप्यनुज्ञातम् परमाणुग्राहकस्य बाधकत्वात् । अन्यथाऽस्योदयासम्भवात्। तस्मादुपजीव्यं बाधकमिति॥ उपजीवकं तु दुर्बलत्वाद्बाध्यं। यथेदमेवानित्यत्वानुमानम् ॥ तृतीयन्तु सत्प्रतिपक्षः समबलत्वात् ।

यस्य प्रत्यक्षादिप्रमाणेन पक्षे साध्याभावः परिच्छिन्नः स

---

(१) समबलमिति शेषः

कालात्ययापदिष्टः। स एव बाधितविषय इत्युच्यते । यथा। अग्निरनुष्णः कृतकत्वाज्जलवत्। अत्र कृतकत्वं हेतुः। तस्य च यत्साध्यमनुष्णत्वं तस्याभावः प्रत्यक्षेणैवपरिच्छिन्नः त्वगिन्द्रियेणाग्नेरुष्णत्वपरिच्छेदात्॥तथा परोपि कालात्ययापदिष्टः॥यथा घटस्य क्षणिकत्वे साध्ये प्रागुक्तं सत्वं हेतुः। तस्यापि च यत्साध्यं क्षणिकत्वं तस्याभावोऽक्षणिकत्वं प्रत्यभिज्ञातर्कादिलक्षणेनप्रत्यक्षेणपरिच्छिन्नं। स एवायं घटो यो मया पूर्वमुपलब्ध इति प्रत्यभिज्ञया पूर्वानुभवजनितसंस्कारसहकृतेन्द्रियप्रभवया पूर्वापरकालाकलनया घटस्य स्थायित्वपरिच्छेदादिति॥एते चासिद्धादयः पंच हेत्वाभासाः [1]यथाकथञ्चित् पक्षधर्मत्वाद्यन्यतमरूपहीनत्वादहेतवः स्वसाध्यं न साधयन्ति ।

येपि लक्षणस्य केवलव्यतिरेकिहेतोस्त्रयो दोषा अव्याप्त्यतिव्याप्त्यसम्भवास्तेप्यत्रैवान्तर्भवन्ति नतु पञ्चभ्योऽधिकाः। तथाहि ॥ अतिव्याप्तिर्व्याप्यत्वासिद्धः विपक्षादव्यावृत्तत्वात्सोपाधिकत्वाच्च । यथा। गोलक्षणस्य पशुत्वस्य गोत्वे हि सास्नादिकं प्रयोजकं। नतु पशुत्वं। तथा। अव्याप्तेर्भागासिद्धत्वं। यथा गोलक्षणस्य शाबलेयत्वस्य॥ एवमसम्भवोपि स्वरूपासिद्धः। यथा गोलक्षणस्यैकशफत्वस्येति ।

---

(१) यथार्थपक्षधर्मेति २ पु.।

अभिप्रायान्तरेण प्रयुक्तस्यार्थान्तरं परिकल्प्य दूषणाभिधानं छलं।[1] यथा। नवकम्बलोयं देवदत्त इति वाक्ये नूतनाभिप्रायेण प्रयुक्तस्य नवशब्दस्यार्थान्तरमाशङ्क्य कश्चिद्दूषयति। नास्य नवकम्बलास्सन्ति दरिद्रत्वात्। नह्यस्य द्वयमपि संभाव्यते कुतो नवेति। स च वादी छलवादितया ज्ञायते।

असदुत्तरं[2] जातिः। सा चोत्कर्षसमादिभेदेन बहुविधा विस्तरभिया न कृत्स्नोच्यते॥ तत्राव्याप्तेन दृष्टान्तगतधर्मेण साध्ये पक्षे अव्यापकधर्मस्यापादनमुत्कर्षसमा जातिः। यथा। शब्दो नित्यः कृतकत्वात् घटवत् इत्युक्ते कश्चिदेवमाह यदि कृतकत्वेन घटवच्छब्दो नित्यः स्यात्तर्हि तेनैव हेतुना तद्वदेव शब्दः सावयवोपि स्यात्॥ अपकर्षसमा तु दृष्टान्तगतेन धर्मेणाव्याप्तेनाव्यापकस्य धर्माभावस्यापादनं। यथा पूर्वस्मिन्प्रयोगे कश्चिदेवमाह यदि कृतकत्वेन हेतुना घटवच्छब्दो नित्यः स्यात्तेनैव हेतुना घटवदेव हि शब्दः श्रावणोपि न स्यात्। नहि घटः श्रावण इति।

पराजयहेतुर्निग्रहस्थानं। तच्च न्यूनाधिका[3]पसिद्धान्ता[3]र्थान्तरा-

---

(१) छलं त्रिविधम्। वाक्छलमुपचारच्छलं सामान्यच्छलं चेति। तत्र विस्तरभिया वाक्छलस्यैव लक्षणमुदाहरणं च वक्ष्यति। (२) स्वव्याघातकमिति शेषः (३) अनुपयुक्तानां स्वरूपभेदप्रतिपादकानामनतिप्रयोजनानामलक्षणमदोषाय इति ६ पु.।

ऽप्रतिभामतानुज्ञाविरोधादिभेदाद्[1]बहुविधमपि विस्तरभयान्नेह कृत्स्नमुच्यते ॥ यद्विवक्षितार्थे किञ्चिदूनं तन्न्यूनं ॥ विवक्षितात्किञ्चिदधिकमधिकम् ॥ सिद्धान्तादपध्वंसोऽपसिद्धान्तः । प्रकृतेनानभिसम्बन्धार्थं वचनमर्थान्तरं ॥ उत्तरापरिस्पूर्त्तिरप्रतिभा ॥ पराभिमतस्यार्थस्य स्वप्रतिकूलस्य स्वयमेवाभ्यनुज्ञा स्वीकारो मतानुज्ञा ॥ इष्टार्थभंगो विरोधः ॥ इहात्यन्तमुपयुक्तानां[2] स्वरूपभेदेन भूयो भूयः प्रतिपादनमनतिप्रयोजनानां च लक्षणमदोषाय । एतावतैव बालव्युत्पत्तिसिद्धेः ॥

॥ इति श्रीकेशवमिश्रविरचिता तर्कभाषा समाप्ता ॥

शिवम्.

---

(१) आदिपदेन प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासन्न्यासनिरर्थकाविज्ञातार्थकापार्थकमप्राप्तकालपुनरुक्तादयो ग्राह्या इति शिवम् । (२) आत्मादिलक्षणानाम् इति तार्किकचक्रचूडामणिमुरारिमिश्राः।

शुद्धिपत्रम् ।

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१	२	पा ।	पा
२	१	था ल	थाल
२	११	तमंकर	तमं प्रकृष्टं अतिशयतं कार
२	१२	कर	कार
२	१३	कर	कार
३	१५	कः	कः ।
		योः	योः ।
४	९	स्तु	स्तुनसः
५	४	नां	नाम् ।
५	११	रणं ।	रणम् ।
५	१२	भावात् ।	भावात्
५	१५	पवत्	पवत् ।
६	४	गृह्यते	गृह्यते ।
६	४	क्षणे ।	क्षणे
६	५	पत्ति.	पत्तिः ।
६	१४	त्वात्	त्वात् ।
६	१४	न । तंतुरूपस्य	न तन्तुरूपस्य ।
६	१८	रणम्	रणम् ।
७	९	गन्तृप्र	गन्तृ प्र

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
७	१२	गंन्तृता	गन्तृता ।
७	१३	कलनात्	कलनात् ।
७	१६	मिति	मिति ।
८	३	कार	कर
९	१	लम्	लंतदाइन्द्रियं करणम् ।
९	१०	णा	ण
९	१४	करणं ।	करम् ।
९	१५	णं ।	णम् ।
१०	७	यं ।	यम् ।
१०	१०	यं ।	यम् ।
१०	११	यस	यस्स
१०	१२	यं ।	यम् ।
१०	१६	ष्यते	ष्यते ।
११	२	विनार्थ	विनामर्थ
११	५	यं ।	यम् ।
११	८	यं ।	यम् ।
११	१२	यं ।	यम् ।
१२	१	मि	इ
१२	४	शेषणम्	शेष्यम्
१२	४	शेष्यम्	शेषणम्
१२	१०	ग्रेपि	ग्रेपि ।
१२	१७	संबंघः	संबंधः ।
१२	१६	भो	भौ

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१३	१०	ल्य	च्छ
१३	१२	तथाचे त्यादि गौरीकान्ताइत्यन्त उत्तर पृष्ठ स्थ- टिप्पणी ग्रंथः अत्र (२) इत्युत्तरं ज्ञेयः	
१४	९	विकसं	विकस्सं
१५	४	त्वात्	त्वात् ।
१५	१०	थाहि	थाच
१६	२	यं ।	यम् ।
१६	१५	द्भूत	द्भद्व
१७	३	यं	यंवह्निव्याप्य
१७	६	यथा	तथा
१७	१४	ग्निवा	ग्निसा
१७	१९	जानन्ति	जानन्ति इतितत्र न्यायबहि- र्भूतपंचावयववाक्येति व्या- प्तिवारणार्थत्वात्
१८	१	तार्थात्पंचकरू	तार्त्संचरू
१९	६	ननु	नतु
१९	७	वात्	वात् ।
१९	१२	स्मात्त	स्मान्नत
१९	१५	एवलक्षणमपि ।	एव । लक्षणमपि
२०	४	ह्रीयते	ह्रियते
२०	७	त्वात्	त्वात् ।
२४	६	वत्	वत् ।
२५	१	वत्	वत् ।
२५	५	रणः	रणानैकान्तिकः

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२५	८	त्वात्	त्वात् ।
२५	११	रिति	रिति ।
२८	८	च्यंते	च्यंते ।
३१	९	विशेषत्व	विशेष्यत्व
३१	१३	दीनम्	दीनाम् ।
३१	१५	तरम्	तरम् ।
३१	१५	त्वाच्च	त्वाच्च ।
३१	१६	भवः	भवः ।
३१	१७	भिन्नः	भिन्नः ।
३२	५	त्वापन्नं	त्वापन्नम्
३२	१०	यति नचा ३भावमपि	यति नचा ३भावमपिमपि।प्र
३२	१०	विशेषणे४	विशेषणे३
३२	१७	आपन्नम् २ पु (३)	०
३२	१८	(४)	(३)
३३	३	मपि	मपि ।
३३	१७	धत्ते ।	धत्ते
३४	५	त्वापत्तिः	त्वापत्तिः ।
३४	६	न्यते२	न्यते
३४	८	पित्यैव	पत्यैन
३४	१४	तायाः	तायाः ।
३४	१५	तत ।	तता ।
३४	१६	३गृह्य	३गृह्य
३४	१८	जनितम् २ पु (३)	०

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
३५	४	गृह्यते	गृह्यताम्
३५	५	त्यर्थः	त्यर्थः
३५	९	णमनुमीयं	ण्यमनुमीयं
३५	१२	तप्त	सप
३५	१८	गृह्यताम् २ पु (२) अन्यतः २ पु (३)	०
३६	६	सक्षः	सक्षः ।
३७	४	वति	वति ।
३७	१९	रीरं	रीरम् ।
३८	३	गृह्णति	गृह्णाति
३८	९	व्यापि	व्यापि ।
३८	१०	त्वात् ।	त्वात्
३८	१४	हकं	हकम् ।
३८	१५	श्रोत्रम्	श्रोत्रम् ।
३९	१३	गः	गः ।
३९	१७	एँव	एव
३९ ३९	१८ १९	(३) अनित्यानांरू- पादयोऽनित्याएवइत्य- धिकम् २ पु	०
४०	२	पृथक्	पृथक्त्व
४०	३	वत्	वत् ।
४०	५	यथासौरादितेजः	यथासौरादितेजः ।
४०	६	पिण्डी	पिण्डी

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
४०	६	कम्	कम्
४०	६	स्पर्श	स्पर्शम्
४०	७	तत्	नानुद्भूतरूपस्पर्शम्
४०	८	गृह्यते	गृह्येत
४०	९	कृतः	कृतः ।
४०	९	यथा	यथा
४०	९	यम्;	यम् ।
४०	१०	स्पर्शम्वा	स्पर्शवा
४०	११	यथा	यथा ।
४०	१३	पिण्डितं	पिण्डीभूतं
४०	१६	थिवी	थिवी ।
४०	१७	(५) स्पर्शनेनगृह्यते	०
४०	१८	२ पु	०
४०	१८	२ पु ।	इत्यर्थः
४१	६	थिव्या ।	थिव्यादेः ।
४३	५	रणाल	रणार
४३	१२	आदि	त्र्यादि
४३	१३	कलात् ।	कलात्
४४	१	शम्	शम् ।
४४	३	षात्	षात् ।
४५	४	रीतं	रीतं
४५	८	देशं ।	देशं
४५	१८	कारणम् ।	कारणम्